N.A.

Sankar samhitā: Asurkand, Veermahendrakand & Deokand

शंकर संहिता: असुर काण्ड, वीर महेन्द्र काण्ड और देव काण्ड

Sanskrit

Paper - Handwritten

1910 sambat (165 years old)

116 Folio

11.8" x 5.4"

Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शंकर संहिता।
आसुर कांड

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० श्रीगणेशायनमः ॥ ॐ श्रीशिवप्रियं देवं देवानामधिदैवतं ॥ भजेहं विघ्नराजंतं विघ्नहंतारमव्ययं ॥
१ १ ॥ कविं कवीनामीशानं गणानां गणनायकं ॥ वक्रतुंडं महाकायं विघ्नध्वंसं नमाम्यहं ॥ २ ॥ कार्त्तिकेयं म
हासेनं कुमारं पुष्करस्रजं ॥ नमामि केकिकंठस्थं किंकिणीनादमेदुरं ॥ ३ ॥ ऋषय ऊचुः ॥ भगवन्सूत सर्वज्ञ
पुराणार्थविशारद ॥ श्रूयते सिंहवक्त्रस्य तारकस्य महौजसः ॥ ४ ॥ अन्येषामपि दैत्यानामुत्पत्तिं च त
थाक्रियां ॥ विस्तरेण वदाद्य त्वं शुश्रूषा महती च नः ॥ ५ ॥ सूत उवाच ॥ शृणुध्वमृषयः सर्वे कुमारायाः एम
मितौजसे ॥ उक्तं गौर्या तिना पूर्वं तेऽहं वक्ष्याम्यनुक्रमात् ॥ ६ ॥ अस्ति दैत्यगुरुः कश्चित्काश्यपाख्य १
स्तपोधनः ॥ ब्रह्मसूनुर्जितः क्रोधः सत्यवाक् धर्मतत्परः ॥ ७ ॥ सतु दैत्यान्वहून्षड्विषष्टिकोटिमिता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्नतः ॥ दित्यां हि जनयामास महावीरपराक्रमान् ॥ ८ ॥ तेषामधिपतिः श्रीमानसुरेंद्रो महासुरः ॥
स तु मंगलकेशिन्यां युक्तः पुत्रीमजीजनत् ॥ ९ ॥ सुरसाख्यामसादृश्यां सर्वावयवसुंदरीं ॥ सा तु दै
त्यगुरुं शुक्रं पर्युपास यदंतिके ॥ १० ॥ शुक्रस्तु भगवांस्तस्यै विद्यां नानाविधां तदा ॥ उपदिश्यानु तां ना
ममायेति च चकार ह ॥ ११ ॥ देवतानां समृद्धिं च दैत्यानां संक्षयं तथा ॥ दृष्ट्वा तु मनसा स्मृत्वा शैलादे
र्वैलसेणध्वरे ॥ १२ ॥ शापं संपन्नाज्ञानसां देवतानां तदोशनाः ॥ विचार्य योग्यमिकार्यं चतामाह वचनं पु
नः ॥ १३ ॥ माये ह्यद्य दैवैः ऋषिभिर्नोदिता ग्नमहासुरः ॥ त्वं पिता वा सुरेंद्रो यं नितरां खिन्नमानसः ॥
१४ ॥ त्वयेहानीं प्रतिष्ठाप्य रसगे पापन्ने दानवाः ॥ तस्मात्त्वं काश्यपं गत्वा पुत्रानुत्पादनाम च ॥ १५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं० सं०
२

कृत्वा तेषां समर्घ्यं च गांगं चैव व्रतं तथा ॥ उपदिष्टा मुरारम्यं च स्वपार्श्वे त्वं तपश्चर ॥ १६ ॥ तथेत्युक्त्वा वसा
भूपः पितरं च क्षमाजिज्ञपत ॥ निर्ययौ व्रतदुस्स्थला सा स्नात्वा पापरे वसा ॥ १७ ॥ येयैः संभ्रमिता चासौ तांस्ता
न्मोहपरापरागान् ॥ परित्यक्त्वा तदानीं सा काश्यपे परत्रिनिष्ठति ॥ १८ ॥ तत्रागत्वा महोद्धूपान् मंडपांश्चि
त्रमंडितान् ॥ वापीकूपांस्तथावासानारामान् पुष्पशालिनः ॥ १९ ॥ क्रीडापर्वतसंघं च मायया निर्ममे स्मरण
त ॥ एतत्सर्वं तदापश्यद् दृष्टः काश्यपनामकः ॥ २० ॥ किमिदं चित्रमाश्चर्यं मंडपादिकृतं तथा ॥ ब्रह्मणा एम
विष्णुना वापि देवेनान्येन वा पुनः ॥ २१ ॥ इति चिंतापरे तस्मिन्न्दृष्टौ सर्वं त्रपमयाति ॥ दृष्ट शेषपर्वताग्रे सा रमणी २
यां गपरिष्ठकां ॥ २२ ॥ मायया मन्मथस्सर्वे स्वनिधिभूतां तदा स्मरणात् ॥ उपसर्पे समीपं नाम पश्यद् विसत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मः ॥२३॥ उवाचवचनंस्निग्धंकाश्यपुत्रंरसार्थवत् ॥ कात्वमेकाकिनीनारीकिंनामाकस्यकासिवा ॥
२४ ॥ कोदेशःक्वागताचाद्यवदसर्वंवरांगसुंदरी ॥ मायोवाच ॥ अहमेकाकिनीनारीतिष्ठाम्यत्रचपर्वते
॥२५॥ तपस्विनात्वदंपुत्रंकिंत्वयावचनंमम ॥ मेरोःसमीपमुत्क्राहंगंगांस्नातुमिहागता ॥२६॥
तिष्ठत्वमत्रगच्छामियन्मेमनसिवर्त्तते ॥ काश्यपः ॥ आनीयतेत्वत्रगंगास्थानानान्यपिमहंनिव ॥ २७
दु तीर्थानिचतत्रयादेवानभुंजेचामरास्त्विदं ॥ ददामिपुत्रानदिव्यस्त्रीसहस्रपरिचारकां ॥२८॥ अंगीकुरुत्वमा न
मत्ररहस्यानेमनोहरे ॥ इत्युक्त्वासानिचित्रांगीस्मयमानमुखांबुजा ॥२९॥ अंतर्हिताततस्तस्मादचिरेण
स्फुलनेवसा ॥ तस्यामंतर्हितायांतुकाश्यपस्तपतांवरः ॥३०॥ पपातभूमावचिरान्मोहासक्तमनाभव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यं०७सं०८ शं ॥ विललापसुदुःखार्तो यथाकामहतो जनः ॥ २१ ॥ तादृशं तमभिंहृष्ट्वा तत्रैवाविरभूत स्मराङ्गना ॥ आविर्भू
२ तां तु तां दृष्ट्वा मोहेनापागतो स्वयं ॥ २२ ॥ ननर्त्त बहुधा दैवस्मयमानमुखाम्बुजः ॥ अकिंचनो यथा द्रव्यं लब्ध्वा
त्यंतं सुखी भवेत ॥ २३ ॥ प्रणनाम च मायायाः पादयोः प्रणयान्वितः ॥ सा तु तं वचनं प्राह प्रेम्णा कामातुरं
तदा ॥ २४ ॥ काश्यपाद्यमयाप्राप्तं यादृशं रूपमद्भुतं ॥ गृहीतं तु तादृशं रूपं समर्थोऽहं मायया हं ॥ २५ ॥ इत्युक्तो
तादृशी रम्यां काश्यपो योगिनां वरः ॥ गृहीत्वा कामरूपं तु रमया मासमंडपे ॥ २६ ॥ कस्मिंश्चिद्दिवसे ज्ञने रम्ये राम
भूयो भूयस्मराहितः ॥ जातस्तदा तौ श्रूरख्यो दैत्यानामग्रणीर्महान् ॥ २७ ॥ यामिन्याः प्रथमे यामे दे २
ते यानं चवाहिनी ॥ द्विंमान्सहस्रं तु तदा तयोः स्वेदजलेन सा ॥ २८ ॥ पुनश्च मंडपेन्यस्मिन्नै सिंहरूपं चत्ता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वुभौ॥रमयामासतुः कृत्वा सिंहवक्त्रस्तदाभवत्॥३९॥सहस्रवक्त्रानिचयोऽष्टसहस्रकरस्तथा॥वभूव
वाहिनीचान्याचत्वारिंशन्मितातदा॥४०॥सहस्राणांमहाघोरानरंगस्वेदविंदुषु॥सिंहवक्त्रीतथान्य
स्मिन्मंडपेचित्रमंडिते॥४१॥ततोपमहरेगत्वागजरूपेणतावुभौ॥लेभनेवक्रतुर्भेयतस्तथागजमुखोत्रवै॥४२॥
तारकोनामदैत्येंद्रः समजायतपेशलः॥चत्वारिंशत्सहस्राण्यावाहिनीगजरूपिणी॥४३॥वभूवमंडपेन्य
स्मिन्स्वतुर्थेमहोत्सवेतौ॥अजरूपंगृहीत्वाघक्रीडयामासतुः पुनः॥४४॥तदानीमजवक्त्राख्योवभूवासुर
कन्यका॥त्रिंशत्सहस्रगणितावाहिन्यंन्याजरूपिणी॥४५॥स्वेदविप्रुड्सुजननमापभीमाचसात्रवै॥मं
डपेमंडपेभूयः समाप्तेचक्रतुस्तदा॥४६॥सुरतंरूपमास्थायतरस्रोतस्तुतथात्रतौ॥व्याघ्रस्त्वमृगगोकसव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं०७सं०७ रुद्रास्तां नत्रैव च ॥ ४७ ॥ गोमायोर्ब्रह्मा हीनां मृगाणां रूपमास्थितौ ॥ तदा ब्रह्मसहस्त्राणां वाहिनीसमजायत

४ त ॥ ४८ ॥ ततरूपेण तान्ब्रह्म्या द्विल्लमृगाश्लितांततः ॥ असुरान्भूरिसंहारंक्ष्मातारकानापिकन्यया ॥ ४९ ॥ वि

स्मयोत्कृष्टहृदयोस्वरूपंजर्हतुः स्मरणात् ॥ तदानुपितरौनत्वाभूरयोमहासुरः ॥ ५० ॥ किंकृत्यंपितर

स्माकंब्रूहिसंदेपयातयं ॥ मातुश्चसंमतंकिंवादेवमुक्त्वासंस्थितः ॥ ५१ ॥ कश्यपउवाच ॥ शृणुएवनुपुत्राः

सर्वेपियन्मेमनसिवर्तते ॥ तपश्चवसहाकार्यंगुष्माभिर्विजितेंद्रियैः ॥ ५२ ॥ तपसादेवताः पूर्वंदेवतात्वं एम

प्रपेदिरे ॥ ऋषयश्चतथाकेचित्जीवन्मुक्तिंगताः खलु ॥ ५३ ॥ त्रिपदार्थस्यविज्ञानंसंपाद्यंसर्वे ४

ह्यनघाः ॥ विज्ञानेनाभिवमाप्तित्वभ्यतेसुखरूपिणी ॥ ५४ ॥ धर्मोपिसर्वदाकार्यःपापंविवर्जितये

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूतउवाच ॥ तपसाब्रह्मवि स्मिंद्रुमपुरा ब्रह्मसूरो नमाः ॥ शिवस्यानुग्रहंप्राप्यस्वंस्वंस्थानमवापिरे ॥१॥ ३

तथा ॥ धर्मेणाकेचिदृषयः स्वर्लोकंलेभिरेपुरा ॥५५॥ कृपाचसर्वभूतेषुनित्यंकार्याविचक्षणैः ॥ एवमु
क्तगुणोपेतैर्मुमुक्षाभिर्वीतकिल्बिषैः ॥५६॥ शंभोरनुग्रहस्तस्मात्सोप्राप्यतेनात्रसंशयः ॥ इहचामुत्रचाप्ये
तिसिद्धिंशंभोरनुग्रहात् ॥५७॥ इतिश्रीशंकरसंहितायांआसुरकांडेप्रथमोध्यायः ॥१॥ ॐ ऋषयस्तपुराके
चित्तपःकृत्वासुदुस्तरं ॥ शंभोरनुग्रहंप्राप्यस्वाभीष्टंचभुवंगताः ॥२॥ तस्मात्सर्वप्रयत्नेनपुष्पाभिस्तपसा
शिवं ॥ तोषयित्वात्रलब्ध्वाभुक्तिर्मुक्तिःपरत्रच ॥ ३ ॥ अस्तिचात्रकथापुण्यापुष्पाकंतांब्रवीम्यहं ॥ पूर्वं
तपःप्रभावेनकुत्सःकन्यांमृतामपि ॥४॥ पुनःसंजीवयामासस्वापाठुद्धामिवसृष्णात् ॥ तथान्यत्रग
जस्यापिदेवत्वंदत्तवान्खलु ॥५॥ तथातपोमहिम्नैवमकंडुश्चाप्यजीजनत् ॥ मकंडुस्ततपापुत्रंब्रह्म

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०ऽसं० विस्विंद्रपूजितं ॥६॥ मार्कंडेयं नु तपसा लब्ध्वा त्वन्यपरायणा ॥ मार्कंडेयस्तु तपसा प्रसाद्य परमेश्वरं ॥७॥
५ मृत्युमप्यजयन्नित्यं पदमप्याप्तवान्खलु ॥ इत्युक्त्वा मुनिवर्यो यं नूनं भावं जगाम हि ॥८॥ ततः प्रोवाच
वचनं मायापुत्रान्वैष्णवं ॥ पद्महस्तं वचनं पुत्रान्नूपिनानत्तपतां वरः ॥९॥ मत्तो ता पोषितानामेव पुष्पाकं तत
दाम्यहं ॥ रेस्वर्यं पंचपौमापुत्रनप्याकीर्तिः प्रद्योयसी ॥१०॥ प्रभुत्वमार्जनीयं वै पुष्माभिः पौरुषाश्रयैः
॥ वरदीपमितिरव्यातमुदम्मागेष्विनेर्महत् ॥११॥ तत्र गत्वा वीरपागः क्षिपतां शिवतुष्टये ॥ अयेषितानि रम
दुष्माणिपानितत्स्यदहाम्यहं ॥१२॥ तत्रप्रसन्नो गोरि पोलभ्यतां पत्नयो हितं ॥ इत्युक्त्वा वचनं पुत्रान्माः ५
यातेषां पुनरत्रसा ॥१३॥ तं दृष्ट्वैव तपामंत्रानुपरिह्याविसर्जयत् ॥ पुनश्चापि ऋषिं प्रेक्ष्य प्रोवाच वच

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नेतद्दा॥१४॥मायेतिनाममम वैब्रागतापुत्रकांक्षया॥उमाहितात्त्वयासम्यगिमेपुत्रामहौजसः॥१५॥
गच्छाम्यहंतपस्तप्तुमित्युक्त्वासाययौस्वरगात्॥तस्यांगतायांतुऋषिःकाश्यपस्तद्दर्शनात्॥१६॥वि
ललापसुदुःखार्त्तोभ्रष्टंमूढमनाइव तादृशंतमथालोक्यब्रह्मास्वयमिहागतः॥१७॥ब्रह्मोवाच॥किं
वृथाकाश्यपाद्यत्वंरोदिषीहवहाज्ञवत्॥मात्वंज्ञेऽरोदनंपुत्रसुखीभवमदाज्ञया॥१८॥नमस्वंहितपत्नी
मेतद्दोषमथामायवै॥महेश्वरंसमुद्दिश्यपसर्वाघोघहारंपरं॥१९॥इत्युक्त्वांतर्हितोब्रह्मायथागतम
५ तुंस्वरगात्॥काश्यपस्तुतपःकर्तुंस्वाश्रमंप्रययौतदा॥२०॥तत्रेमायाकृतानीवमंडपैस्थानिचस्व पादि
रगात्॥अदर्शनंगतान्येवतदानीतान्यहोद्विजाः॥२१॥अथपूरोमहासेनःप्रीतयेपरमेशितुः॥भ्रा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० त्सर्वांसहितःकर्त्तुमतस्यैवाध्वरंतदा ॥ २२ ॥ तदादैत्यगुरुर्दैवान्मध्येमार्गेजगामवै ॥ तान्वीक्ष्यनितरां
६ भीमान्भीतिंसंप्राप्तवानहो ॥ २३ ॥ जजापबहुरूपमंत्रंचैतेषांसुमुखकारणं ॥ शूरस्यान्तिकेगत्वायु
ष्माकंगुरुरस्म्यहं ॥ २४ ॥ इत्युक्तवानपाद्यांवंपादयोरभिवंदनं ॥ चकारसुरवर्योपिविनयेनाननतस्य
नः ॥ २५ ॥ शुक्रोपिदैत्यवर्यायशिवमंत्रंततस्त्वदं ॥ पापविशुद्धिनामानमुपदिश्यस्वस्थलंगतः ॥ २६ ॥
शूरस्ससैन्यःसहजोवरद्वीपंद्रुतंययौ ॥ पागपालांवनजातोनिर्ममेदपाक्षोजनैः ॥ २७ ॥ सहस्राणिगत राम
हाक्षिप्रंप्राकारितमहीधरं ॥ परितस्सृतपानसेनांनानायुधविभीषणं ॥ २८ ॥ स्थापयित्वातमध्येपं ६
योजनानांसहस्रशः ॥ आपापामानायपुक्तंतुकुंडंचाग्नेश्चकारवै ॥ २९ ॥ परितस्सृतपानस्यकुंडगन्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

घोत्तरं शतं ॥ तान्यावृत्य च कुंडानां सहस्राणि नवापि वै ॥ ३० ॥ कृत्वा प्रधानकुंडेयं होतुं न व्रजगाम वै ॥
तस्मिन्प्रधानकुंडेयं महीम्रस्यातिभीषणः ॥ ३१ ॥ उच्चारयामास तदा पातालं तदधः स्थला
न् ॥ ततस्तु मायाहेमाद्यं द्रव्याण्यपि ददावियं ॥ ३२ ॥ अर्कं चैव तथा लर्कमपामार्गपलाशकं ॥ निं
वं शसं तिंत्रिणीं च भूतावासं तथैव च ॥ ३३ ॥ एवमाद्यं च समिधं विषवृक्षसमुद्भवां ॥ क्षीराज्यदधितै
लानि मधूनि च बहून्यपि ॥ ३४ ॥ आढकं च तथा मुद्गं माषं चापि तिलं तथा ॥ कुलुत्थं सर्षपं चैव तंडुला
न्व्रीहिभिः सह ॥ ३५ ॥ गोच्छागमहिषाहीनां सहस्राणि शतं पुनः ॥ रुधिराणि च मांसानि शतशोथ
सहस्रशः ॥ ३६ ॥ कर्पूरं चंदनं चैवं सह कस्तूरिकारसैः ॥ पुष्पाणि च विचित्राणि सुगंधीनि बहून्यपि ॥ ०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०ने०सं० ३७ ॥ दर्भानन्तु हं मस्तांचस्तुथितिं च नद्यारिणि ॥ एवमादीनि भूयांसि यज्ञोपकरणानि च ॥ ३८ ॥ त्रिभि
७ र्योजनमानैस्तु सहस्राणां नतानसा ॥ ततस्तु भूरपक्षो सो तु र्गं भैरवमेव च ॥ ३९ ॥ भद्रकालीन्तथाभू
तं प्रेतं चापि पिशाचकं ॥ डाकिनीगणसंघं च चामुंडां रिक्तपूजयत् ॥ ४० ॥ निर्मथ्यार्यारणीं चासौ व
न्हिं प्रज्वलयन्नृपैः ॥ कुंडमध्ये प्रतिष्ठाप्य वज्रस्तंभमथाढकैः ॥ ४१ ॥ तिलैर्माषैस्तथा मांसैराज्यैः
या सैलैर्जुहाव सः ॥ सहस्राणां शतं दिव्यं वर्षाणां शिवमंत्रतः ॥ ४२ ॥ तथाप्यैषु च कुंडेषु सिंहास्यस्ता एम
रकोपि च ॥ क्रमेण षोडशं शतं चाष्टोत्तर सहस्रके ॥ ४३ ॥ तदा तु कुरुवनुस्तो ष्ठो महावीरपराक्रमो ॥ ७
न तथापि महादेवः प्रादुर्भावं जगाम वै ॥ ४४ ॥ ततः प्रस्तु संक्रुद्धो गगने च समुत्पतः ॥ स्थित्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वर्षसहस्रंतुछित्वांगंस्वंउशस्त्रया॥४५॥जुहावहविषैर्मांसैर्मनसापिशिवंस्मरन्॥एवंकृतेपिभगवान्न्या
गेनप्रससादवै॥४६॥पुनस्तुमूरपघोसावुस्तुस्तोर्ध्वंकर्तुंतदा॥वज्रस्तंभोपरिपतन्यावत्तन्मूलमागतः
॥४७॥कुंडमध्येतदाप्राणान्मुमोचासुरनायकः॥ततस्तुहाहाकारश्चदैतेयानांमहानभूत्॥४८॥
देवानांतुतदात्यर्थंसंतोषःसमजायत॥अथसिंहमुखश्चापिछित्वामूर्ध्नौजसास्वकान्॥४९॥पुनर्भू
पस्तथोत्सन्नानुत्सन्नानसंजुहावसः॥तारकोप्येवमन्येपिदैत्याःपेतुर्वैलीयसः॥५०॥तथापिन
महादेवोवरदान्योध्यस्ततांगतः॥तत्रैवसिंहवक्त्रोपिप्राणान्हंतुमियेषसः॥५१॥ब्रह्मांडभित्तिप
र्यंतमग्नेर्ज्वालाप्रधीयसी॥ऊर्ध्वंचैवमथश्चापिनागलोकंददाहवै॥५२॥तदानीमीश्वरस्तत्रस्यावि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्यक्त

शि०॰सं० रत्वेनचागतः ॥ इंद्रंकेरेणगत्वाचविंश्सुपृष्टास्थितानाथा ॥ ५३ ॥ इतस्ततस्त्वलत्पादयुगलोवेदपाठकः ॥
८ सिंहासुरस्यनिकटंगत्वावचनमब्रवीत् ॥ ५४ ॥ केयूयंकस्यवापुत्राः किंवायुष्माभिरत्रवै ॥ क्रियतेमेव
हायेवपप्यावदनुपूर्वशः ॥ ५५ ॥ सिंहउवाच ॥ शृणुतब्रह्मविच्छ्रेष्ठयुष्मत्संदर्शनादहो ॥ अस्माकंप्री
तिरत्यर्थंयथाचपरमेष्ठिनः ॥ ५६ ॥ वयंदैत्याःकाश्यपस्यपुत्रावैवीरयागतः ॥ अस्माद्यपरमेशानेरमा
प्राप्तर्थमागताः ॥ ५७ ॥ अस्मत्सहायान्महेशस्यमज्ञातानिधनंगतः ॥ कुंडमध्येमहावीरोवज्रस्तंभेपतत् राम
त्किल ॥ ५८ ॥ तदिदानीमहंचापिदेहत्यागेप्रवृत्तधीः ॥ वृद्धउवाच ॥ मास्तुतेमरणंवीरपुत्राहिष्यंभवि ८
ष्यति ॥ ५९ ॥ इत्युक्त्वाचानयामासवृद्धोगंगांविपद्धतां ॥ अथसमापपृथिवींमहीधरानमितेतरूर्मिकैः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सराणां तदा ॥ भयात्ताडितकंदुकच्छिन्ने यो विदधाने व समागता उवै ॥ १० ॥ आकाशगंगापयसा शशामसर्वेषु
कुंडेषु समुद्धतो ग्निः ॥ सिक्तास्तदामराः मुखाब्जैहृष्टाः सर्वे पि ते वृद्धिमवापुरत्र ॥ ११ ॥ इति श्रीशंकरसंहिता
यां असुरकांडे द्वितीयोऽध्यायः ॥ २ ॥ स्लो ३० ॥ अथाविरासीद्भगवानेविकासहितः प्रभुः ॥ लसत्कंक
णकेयूरमुक्ताहारमविभूषितः ॥ १ ॥ कपर्दैर्वद्धचंद्रार्धसमलंकृतमस्तकः ॥ स्फुरज्जटाजटोत्सर्पितरि
नीपरिमंडितः ॥ २ ॥ मंदहासवहिर्भास्वद्दंतपंक्तिविराजितः ॥ त्रिपुंड्रावलिभिर्हीमलललाटाहिस्थलोज्व
लः ॥ ३ ॥ भूतिभूषितसर्वांगो रुद्राक्षस्रग्भिरावृतः ॥ आरुह्य शाङ्करं दिव्यं नानालंकारशोभितं ॥ ४ ॥
विसतंतुनिभैः स्वच्छैः चामरैरभिशोभितं ॥ क्वणत्किंकिणिकानादवधिरीकृतदिङ्मुखं ॥ ५ ॥ भोगि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०क०सं० भोगमतिंदृष्टीवाहवालविरंजितं ॥ कंठालेविलसद्रुद्राक्षनिधनिनदिक्ष्युरं ॥ ६ ॥ महतनाककुदाप्युक्तं
२ महतंकंधरबंधुरं ॥ वाद्यप्रभेदैश्चभितस्ताडितैर्मुनदाम्बकं ॥ ७ ॥ गणैर्नानाविधैरन्यैर्ब्रह्मविष्ण्वादिभिःसु
रैः ॥ आवृतःसर्वतोदिव्यस्तूयमानैःपरिसेवितः ॥ ८ ॥ नाहृष्टांतंमहादेवंमेस्मयसंफुल्ललोचनः ॥ सूरपद्मः
सु सहभ्राताप्रासेनाभिःप्रणनामतं ॥ ९ ॥ अस्तौषीन्नुतोत्रवर्यैस्तंस्वंदेहंतंगुंभनेः ॥ अथतंपरमेशानःप्रोवाच
वचनंतदा ॥ १० ॥ स्मयमानमुखांभोजमर्कांदरसास्यदं ॥ प्रीतोस्मिनिनरंपुत्रनपसासुरवल्लभाः ॥ ११ ॥ राम
यद्यन्मनसिवोभीष्टंवर्णेतेवृत्तमेनघाः ॥ इत्याभितनसमयद्विभुर्विभित्याहशंकरः ॥ १२ ॥ सूरउवाच ॥ य २
दिप्रसन्नोभगवंस्त्वंकृत्वानुग्रहितान्मया ॥ अपेराणसहस्राणामंडानांसार्वभौमतां ॥ १३ ॥ आज्ञाच

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कंतथास्माकमपिनभ्नरनामपि॥विस्त्वाद्दिदेवताः सर्वायथामतसन्निधानतः॥१४॥पातिपिछंतिसुतरां
ददृता हृष्टमायुधं॥तेषुसर्वेषुगमनागमनंचमपछनः॥१५॥ततस्तुभूरपमंतंभेष्यसर्वेभ्वरोवचः॥सो
वाचक्रूपयायुक्तोपडुक्तंततथास्त्विति॥१६॥अष्टोत्तरसहस्राणामंशनांसार्वभौमता॥अष्टाधिकसहस्रे
षुयुगेष्वत्तुत्तवानघ॥१७॥तथाविमानमैमंइंतेनानारत्नोपशोभितं॥सिंहवाहनमन्यञ्चतथापाम्युपनास्त्र
कं॥१८॥एवमादीनिचास्त्राणिततदैवांकितानिवै॥वज्रदेहंतथाचाग्निकुंडेकृतासुरानवहून्॥१९॥
शतकोटिसहस्रेणवाहिनीनामिनंतदा॥चतुरंगवलंचाचततवम्भूरास्तुभूरिशः॥२०॥तवानुजानामन्ये
षामायुधानिवहून्यपि॥अष्टाधिकशतैचापिपुगानामस्तुधपता॥२१॥अपिवासमरंप्राप्यविनामछ

सहस्रंतु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० क्रिमव्ययं ॥ अन्यैः सुरासुरैर्नागैर्मास्तु वो मरणं भुवं ॥ २२ ॥ इत्युक्तानईश्वरैदेवः सांवः सर्वेश्वरेश्वरः ॥ त
१० तस्तुभूरपमाहिंदैतेयास्तुष्टिमाभिरे ॥ २३ ॥ साधुसाधुत्वयाप्येषिपिनन्तनुः स्वकृपारणपः ॥ इत्यत्तनस्तणा
न केचिद्दावंतः किंतर्किंचवेद्यैः ॥ २४ ॥ भूरपमः पुनः प्रेम्स्यदैतेयानब्रवीद्वचः ॥ इदंतंकालमन्वीक्ष्यपुष्पा
भिरस्पैनमवद्वै ॥ २५ ॥ इत्याहिभूरिकालेषुवामुपचारंतेहाजनैः ॥ नेपिभूपस्त्वहावाचमृषिरेविनयान्विताः ॥ एम
२६ ॥ चतुरंगबलानांतुहन्तानांशंभुनानहा ॥ सेनापतीनिषभस्यासुस्वामिनः कृतवानखलु ॥ २७ ॥ ज १०
गामकाम्पयंनानंसहस्राज्ञावत्तैस्तहा ॥ नमस्कृत्वातुवचनंनमाहप्रश्रयान्वितः ॥ २८ ॥ तानसर्वेश्वरः
शंभुः सुप्रीतः कृतुनामम ॥ अंगनानामाधिपत्यंचदत्तवानपरापमुहा ॥ २९ ॥ इतः परंमनिः कावावरमेघ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इयायुतः ॥ काश्यपस्तु विचिंत्याथ देवानां द्विपदं तदा ॥ ३० ॥ श्रीवाच वचनं युष्मान् गुरोः सविधमेत्य च ॥ श्रू
यतां मनिनिस्त्वेवं तपो विघ्नादि वहुतं ॥ ३१ ॥ अथ सर्वे पि देव्येंद्राः संभूयभयपुस्तदा ॥ भार्गवं स्वहितेयत्तं सर्वे
शास्त्रार्थकोविदं ॥ ३२ ॥ नत्वा बद्धांजलिकरा वत्तां तेच व्यजिज्ञपन् ॥ वुद्धिं चनो वदाचार्य मुकायोकर्यं स्वरू
पिणीं ॥ ३३ ॥ इत्युक्त्वा विनयानम्रास्तस्थुस्तेपुरतस्तदा ॥ शुक्रस्तु स्मेरपद्मानमेकमेकांतमानयत् ॥ ३४
उवाच वाचं वाचालो हृष्टार्थानुविधायिनीं ॥ शिवस्तु मायामाश्रित्य ससर्जे विषदादिकं ॥ ३५ ॥ तथा स्वां
शं विभज्याथ जीवत्वेनावतिष्ठते ॥ शरीरं द्विपसंयुक्तो लीलामात्रप्रयोजनः ॥ ३६ ॥ भग्ने घटे घटाका
शो महाकाशे प्रलीयते ॥ तद्देहविनाशेन जीवस्तु शिवतां गतः ॥ ३७ ॥ तस्मात्तु एयानि पापानि मिथ्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० रूपाणितत्वतः ॥ सोसोप्येवंततस्त्वंतुत्वात्मानेकत्वरूपिणं ॥ ३८ ॥ मत्वाशोकंविमुंचाथब्रह्मविस्त्वादि
११ देवताः ॥ परित्यज्यहरिंध्यायन्शंभुमाकाशमध्यगं ॥ ३९ ॥ इंद्रादिदेवतानांचभयमुत्सादनंमहत् ॥
तेषांपदंप्रपछत्वमसुराणांमहौजसां ॥ ४० ॥ मारणंचततथाकामंपरस्यापिचवंचनां ॥ चौर्यंप्रद्वेष
णंचैवमाहीनिचततथाकुरु ॥ ४१ ॥ अन्यथात्वांनगरणपेक्रोपिमत्सैःसुरैरपिच ॥ सर्वेषुचततथांडेषुत्व १म
दीयेषुप्रजानिशं ॥ ४२ ॥ विचार्यंचविचार्यैवतत्रंतांतंसावधानतः ॥ तस्मिन्निंनंउमध्येत्वंसहभ्रातगणै ११
स्तथा ॥ ४३ ॥ अंउस्यचततहाथामंविस्तारंचमहीधरान् ॥ समुद्रान्द्वीपजातंचलोकान्नानाविधांस्तथा
॥ ४४ ॥ देवतांचैतथालोकपालकानदिगाजानमनून् ॥ प्राणिनश्चतथाचैवमाहीश्चैवततदावदन्
ताश्च हा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नः

४५॥एवमंडेषुसर्वेषुवसंतन्कामयात्रवै॥वक्तव्यंचपुनस्तेषामुक्त्वातान्विससर्जवै॥ततस्तुसूरपद्मासो
प्रतस्थितेमरणाभ्यवै॥आरुह्येंद्रविमानंतुसूर्यकोटिसमप्रभं॥४७॥तुरंगकोटिसंनद्धंनानारत्नविचि॰
त्रितं॥विनाशरहितंचारुछत्रध्वजपरिष्कृतं॥४८॥सिंहाननैस्तथाव्यालीसहस्राणांसहस्रकैः
तुरंगमानांचतथाभूतानांमहतामपि॥४९॥संयुक्तंरथमारुह्यप्रतस्थेसहसावली॥इतिश्री॰
शंकरसंहितायांआसुरकांडेत्रतीयोध्यायः॥३॥सूतउवाच॥तारकोपितदारुह्यस्यंदनंसुमनोहरं
संयुक्तंतुरगाणांतुसहस्रैर्दशभिस्तथा॥१॥तथान्यैरपिनस्त्रापिनायुधपरिष्कृताः॥गजा नः
श्ववाहाश्चपरेसुकुमारागयथवः॥२॥सेनाचमहतीतत्रतस्यैश्चाश्वभत स्थिरे॥काहलीभेरि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० पहृष्टाः सुतरां नादैर्नादितास्तदा ॥३॥ वाद्यभेदाः परितो मृदुडिंडिमझर्झराः ॥ जितांबुधिमहारावास्ताडिता

१२ भृशमत्र वै ॥४॥ खड्गहस्तास्तथा केचिद्दंडभीमकराः परे ॥ खड्गांगपाणयः केचिन्मुसलोद्भुतपाणयः

॥५॥ छुरिकाग्रकरास्तथा केचित्केचिज्जिनखड्गकरास्तथापरे ॥ इतस्ततश्च धावंतः प्रासमादाय चापरे ॥६॥ सा

हसास्तथान्योन्यं ताडमानकराः परे ॥ पांसवश्च तथा सूर्यमार्गपर्यंतमुत्स्थिताः ॥७॥ चतुरंग

बलेनैवं तथा योजनकोटिभिः ॥ संबाधं भाविनाभूमिर्भित्तिसुभिः परितो भृशं ॥८॥ एवं गत्वा सत्वरा एम

चावलैः शृङ्गैर्महत्सुराः ॥ अलकां तु गताने नमावृतां तु हरोयसः ॥९॥ तदा कर्णपकुवेरस्तु दूत १२

वक्त्रेण शीघ्रतः ॥ उवाह सुतरां त्र्यक्षो दैतेयानां वरं तदा ॥१०॥ आशीषिच प्रयुंजानः सांजलिः प्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रयान्वितः ॥ यानानि दिव्यवस्त्राणि भूषणानि बहूनि च ॥ ११ ॥ इत्याभोवाचवचनं भूरूपः पंसमीस्य
वै ॥ त्वदीयोहं वसाम्यत्र रक्ष मां दयया ऽधुना ॥ १२ ॥ विसृष्टस्तेन भूपेन कुबेरः स्वपुरं गतः ॥ लुंठितं च पुरं
तस्य तन्नूवेमसुरैर्भृशं ॥ १३ ॥ कुबेरस्तु तदात्यर्थं दुःखं प्राप सुदारुणं ॥ जेतुकामस्तदीशानं प्रतस्थेसुर
नायकः ॥ १४ ॥ मध्येमार्गं निशम्यास्य चिन्हं मे प्रवरमुज्वलं ॥ त्रिनेत्रादि विमुच्येनं भूरुपघ्नः स्मरणार
हे ॥ १५ ॥ सैंद्रीं दिशं तदा जेतुमिंद्रं भूपो जगाम वै ॥ अरौत्सीत्तस्य नगरं भमरेशस्य चाद्भुतं ॥ १६ ॥ व
सां क्षिप्र छेद ववृशे नानाविधसुख्यवस्थितान् ॥ तदानीं मघवांस्तूर्णमपलायदिवं तस्य ते ॥ १७ ॥
लुंठयामास तस्याशु पत्तनं सैनिकैस्तदा ॥ सुरांगनाश्च शतशो वंदितुं भापिता हिज्ञाः ॥ १८ ॥ इंद्रस्य
धनं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० सरंनंतूर्णमावृत्यांतःपुरस्थितं ॥ धनंबहुतरंप्राप्यभूमिंरत्नान्वासुविस्तरां ॥ १९ ॥ एवंप्रतिगृहंगत्वा
१३ दग्ध्वाचास्यपुरंस्तरणात् ॥ सुरास्तदानींभूपांसः कांप्रासाश्चदुर्बलाः ॥ २० ॥ भूरस्यधावनेशक्ता
जिताश्चासनस्तरणाद्दहो ॥ लुंठितान्नितदातेषामुपरिस्थाप्यनिष्ठुरं ॥ २१ ॥ दग्धुमग्नेः पुरंशीघ्रंनि
र्ययौदनुजाधिपः ॥ महाबलैर्महाशूरैर्धावद्भिः परितोभृशं ॥ २२ ॥ अग्नेः सेनातदावह्नीप्रतस्थेपो
हुमाश्रुतान् ॥ परस्परंजयोः सेनायुयुधेशस्त्रजालकैः ॥ २३ ॥ तारकस्यबलानांसापुरतस्थानुमस राम
मा ॥ पराभवंगतास्तूर्णमग्नेरभ्याशमागताः ॥ २४ ॥ तदाग्निर्निर्ययौतूर्णंक्रोधमूर्छितविग्रहः १३
कालाग्निरिवसंहर्तुंज्वालामालावृतोजगत् ॥ २५ ॥ अस्त्राणिचवहून्याशुमुमोचासुरसंहतौ ॥ त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ततस्तु तारको धीमान्नानास्त्रकृतशिक्षकः ॥२६॥ धनुरादाय सव्येन पुपुजे पाणिनाव्यया ॥ आस्फा-
लयत्तदा ज्यां च प्रलयांबुदनिस्वनां ॥२७॥ आलिढीमार्गमाश्रित्य धनुःशास्त्रक्रमेण सः ॥ ध्यायंस्तदा
पशुपतिमस्त्रं पाशुपतं महत् ॥२८॥ संधयामास धनुषा साक्षाद्रुद्र इवापरः ॥ ततः ससंभ्रममना जात
वेहाभयं गतः ॥२९॥ इदमस्त्रं पशुपतेः सर्गान्लोकान्दहत्यहो ॥ एतस्य लक्ष्यं किं वास्यान्कालाग्नेर्म
शाकारव ॥३०॥ केवा वयं हरस्त्रं ह्ना हा हतोस्मीति चिंतयन् ॥ शरणं तं प्रपद्येह तारकं प्राणहापकं ॥३१॥ इति
निश्चित्य तरसा विमुक्त्वा पुंखसंततिं ॥ तारकाभ्याशमेकाकी रसरसेनि चाब्रवत् ॥३२॥ बद्धांजलिपुटो ग
त्वा त्वदीयोहं विमुंच मां ॥ इत्युक्त्वा स्थितस्तत्र भयकंपितविग्रहः ॥३३॥ ततस्तु तारकः प्रीतिमभ्येत्या-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कां॰ ७ सं॰ ७ सुरपालकः ॥ अग्निमाश्वासयामास वचसा शीतलेन तं ॥ ३४ ॥ यथापूर्वं पुरं गत्वा पालयाग्ने प्रजा भुवं ॥ महा
१४ ज्ञ पापुरे तिष्ठस्व कीर्त्यैन्यकभीर्भृशं ॥ ३५ ॥ इत्याहस्मनलो वह्निरज्ञानेनाविवेचितं ॥ मयापि समतत्वं तत्सर्वं मितु
न्का स्वां पुरीं गतः ॥ ३६ ॥ तन्मूर्तेमेव तस्यापि वल्लुंठितं पुरं भेदनं ॥ असुरैर्बहुधा पुनैकेरंजसा स्ववरार्हकेः ॥ ३७ ॥ २
ततः शूरस्तु शूरसेनकलिंगं मार्येपुनः ॥ यामीहि हंसा पयेतिरश्यमाहविचक्षणः ॥ ३८ ॥ चोदितास्तु
रगास्तेन रथमानीय चक्षरणान् ॥ कलिंगेन ततस्ताभ्यां धर्मराजपुरं गताः ॥ ३९ ॥ चतुरंगबलं चापि चक्रवा रम
लाधिरिवापरः ॥ यमस्य च पुरं सोऽग्रमाक्रांतं दनुजैर्भृशं ॥ ४० ॥ श्रुत्वा यमस्तदाहृष्टं पुरीं द्रुतमुखे नसः ॥ १४
कुबेरस्यापि चाक्रांतं पुरमेतेन सर्वतः ॥ ४१ ॥ इंद्रस्य नगरं दृष्टं तथाग्नेर्लुंठितं भृशं ॥ इति चिंतापरवशोऽज

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वेनास्यागतेंनिकं॥४२॥इत्थंवकुत्तणावसंगुविचित्रंहारमेवच॥तंदुत्वाश्मनणास्त्रमाःस्थिताःपर्वतमानतः
॥४३॥मुहूर्तस्तथाकुलिस्याश्वनुवरमाषकान्तया॥सवमार्हीनिभूयांसिदत्वान्येतेननतस्यवै॥४४॥त्वहाज्ञ
यातवहीपोहंसंयमिन्यांवसाम्यतः॥असुरश्चमहाशूरनगरंनाशयंतिते॥४५॥निवर्सितानाम्मुमांत्वंरसे
स्यारुपमस्वयं॥निवर्त्यतान्तारकोपंहृतवक्रेणल्लुंठकान्॥४६॥धर्मचाप्यास्यवसुधासंभाआप्तुपुरंमति
इतिश्रीशंकरसंहितायां आसुरकांडेचतुर्थोध्यायः॥४॥सूतउवाच॥भैरपित्वातदातूर्णंनिर्कृतेःककुभंवलेः
॥गत्वातस्यापिचपुरंसरोधासुरनायकः॥१॥ततस्तुनिर्कृतिःशीघ्रंनिर्ययोनगराद्बहिः॥अभ्येत्यतारकंश
त्रुंहारकंसांजलिस्तदा॥२॥त्वदधुरहमद्वैवनिवसामितवाज्ञया॥त्वयैवपालनीयोयंमेश्वर्यंवंधुपुत्र

ह

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰ठसं॰७ ये ॥३॥ इत्युक्त्वैवं तेनिर्केलिंवृक्ष्मानन्नपापुरं ॥ तारकः प्रापयित्वा मुमनस्येयवाहन संगीहि गं ॥४॥ प्रस्थानमस्य
१५ श्रुत्वा पवनहरणः प्रायतारिधिं ॥ त्वरया चतत्र ह्यभ्येत्य पुरीं सेनाएं वीयसी ॥५॥ इत ततनश्चज ग्राहपुरस्यानंत
रा रं वहू ॥ वस्त्रमाभरणं चान्यद्द्रव्यं तांभ्रक्षमेवच ॥६॥ अलं तुहर्षं चनगरं नानारत्न समुच्छोभितं ॥ अयवापोः
पुरं चापिसत्पलताप्रापसैनिकैः ॥७॥ वांनत्तु नरसालोकं नाभिसंगतवान्विद्विजाः ॥ तुलं तु ठतस्यनगरं ता
रकः सर्वतोन्वतं ॥८॥ सर्वं जित्वा यथाताते हि प्राप्य चान्मुखेननः ॥ नागानां जयमुद्दिश्य सहसैन्यम एम
भिगम्य पत् ॥९॥ सर्पाधिपनयत्तत्र गुहेमात्राः पराभवं ॥ इतुश्चात्म विविध ग्रामरत्नानि सुवहूनिवै ॥१० १५
पीत्वाम ततं च न त्रन्यम सुरैस्तत्र संभवैः ॥ पूजितः परयाप्रीत्याहू ष्टानन चन्यमद्भुतं ॥११॥ विलद्वारगिरः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म्याणितष्येकामवसन्निधिं ॥ भूरयप्यत्ततस्तूर्णंपुनः प्रापमहीतलं ॥ १२ ॥ सैन्यैर्नानाविधैः सार्धसह
जैश्चवलोत्करैः ॥ गत्वाद्वीपानिरम्याणिनानारूपाणिसर्वतः ॥ १३ ॥ आश्चर्याणिचसंप्रेक्ष्यततश्च्या
निवहून्यपि ॥ क्षीराब्धिंप्रापततःसापत्रशेतेहरिस्त्वयं ॥ १४ ॥ तत्रप्रविष्टाःसेनास्ताःसर्वामत्तगजाइव ॥
लोडयामासुरभितःपीत्वापीत्वाचभूरिशः ॥ १५ ॥ १५ ॥ स्त्रीभूमीचनिशम्याशुविस्नुपत्न्यौनहारवं ॥ च
क्रोविस्नोः समीपंतेगत्वाबोधयतांहरिं ॥ १६ ॥ प्रोचेकिमद्यप्रोतेत्वमकांडेचागतंभयं ॥ मुंचनिद्रांविभो
त्वामितःपालयावांभयंगते ॥ १७ ॥ ततस्तुमुक्तनिद्रोसौयावत्कालेनचोत्थितः ॥ तावद्देवासुराःसर्वे
चागतास्तत्समीपतः ॥ १८ ॥ हरिरारुह्यगरुडमापप्यूरवलांतिकं ॥ कौमोदकीनंदकंचपांचजन्यंसु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं०३सं०३ दर्शनं ॥१९॥ शार्ङ्गं च धनुरादाय बद्धकक्षः सकंचुकः ॥ आरुधिंचन प्यावध्वापृष्ठभागे विचक्षणः ॥२०

१६ सव्येन पाणिना चापमानमय्य गुणेन तत् ॥ दिक्षु क्षिरोतनतदानूंसंयोजयामास वेगतः ॥२१॥ तारकस्य

च सेनायां ववर्षास्त्राणि भूरिशः ॥ सेनाममारवह्नीसानदानद्रव्यपानतानात् ॥२२॥ पत्नीपिताश्वनत्रा

न्ये भारखंडिनविग्रहाः ॥ हैनेयाथकाहुः रवातोस्ताःकंभारणगताः ॥२३॥ ततस्तु तारकः शीघ्रं प्रतस्थे

च जनार्दनं ॥ योद्धुमाहवशस्त्राणि वहूनि समहं स्पृपि ॥२४॥ गुणेन चापं संयोज्य ज्याघातं कृतवा एम

न्द्विजाः ॥ ववर्ष चास्त्रवर्षं च विस्मोहपरिभूरिशः ॥२५॥ तार्क्ष्यस्याभिमशरीरे स्याप्तकस्त्रावं पथ्याभ १६

वेन ॥ असुरारिर्महात्कुद्धो निमितानि शरणिमः ॥२६॥ मुमुंचातस्य गात्रे च तारकस्य नराभशं ॥ पु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नभस्थान्यानिशस्त्राणिमुक्ताछित्वारथंतदा ॥२७॥ खंडशःखंडशोभूमौपातयामाससारथिं ॥ चापंचशत
धाःकृत्वामुमुचेपुनरस्यवै ॥२८॥ आहत्यतारकस्तूर्णमन्यत्स्यंदनमुज्वलं ॥ चापमादायचपुनःसाहत
सपरोभटं ॥२९॥ ववर्षवहुधाचास्यशरीरेघमेमेघवत् ॥ शस्त्राणिनिशितान्यानुतत्रसत्वरितस्तदा ॥३०
शरीरंचास्यविस्फोटन्रक्तजालपरिप्लुतं ॥ अभवत्तरसामुक्तकंचुकंतंनिपातनात् ॥३१॥ ततःक्रोधे
रि नमहताज्वलंनिवर्हस्तदा ॥ नाराचैर्वैववर्षचास्यशरीरेममभेदिभिः ॥३२॥ शूलैर्नानाविधैरस्त्रैःपात
यामाससैवरथं ॥ चिछेदचपुनश्चापंतारकस्यसहस्रशः ॥३३॥ तारकस्तरसाहत्वारथमद्भुतमुज्वलं
॥ आदायधनुरन्यच्चदृढंक्रोधविजृंभितः ॥३४॥ अमुंचच्छरजालंसःसक्रेदेवनदाहरौ ॥ ततःस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

।शं०से० संभ्रमं विस्मुर्मा मायावी बहुरूपभाक् ॥३५॥ तत्रतत्र स्थितः ऽोऽप्रमत्तस्तारको मुरिः॥ शतकोटिसहस्रा
१७ णि शस्त्राण्यपाहापयशस्त्रवित्त ॥३६॥ तारकोऽपि तत्थानूर्णीमानुर्मंत्रे समुत्सारन्॥ प्रभिन्नः शतशो विसंमुज्ञ
घानास्त्रैरसंख्यकैः ॥३७॥ स्कंदहारश्चवर्षास्तोऽगुण्ठधाने परस्परं ॥ युद्धमहोऽतत्तदा विस्मुत्तारको भयामु
स्थितो ॥३८॥ कोमोहं कीकरेणामुके रभारिः स्तदा सुरैः॥ संभ्राम्यतस्मरेणे नैव चित्रे सयचा विभीषणं ॥३९
गदया ताडयामास गदां विष्णोस्तदा भ्रंशं ॥ ताड्यमाना तदा तेनन्यपतन्नदुः रिवताडवा ॥४०॥ पपिव्यां एम
तं दृष्ट्वा कोप्येवं व्यर्थे तामगमात्कितत्व ॥ तारकस्तु तदा नूर्णी विष्णोरस्यमासामागतः ॥४१॥ भ्रामयित्वा गदां १७
स्थूलां वधायुक्तः ऊधाद्विजाः ॥ आगतं तं महावीरमभ्याशे मे स्थमाधवः ॥४२॥ ध्वनयं स्नात तदाशं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रवं मलयं वुद्धनिस्वनं ॥ सुदर्शनं महाघोरं सर्वशत्रुनिकृंतनं ॥ ४३ ॥ अमुं च वज्रनिष्ठूरेन हास्यवस्ससीमभं
भगंतर ॥ पतत्त्वहा पर्जिस्मृतं विचित्रमत्रभो द्विजाः ॥ ४४ ॥ इति श्रीशंकरसंहितायां आसुरकांडे पंचमोध्यायः ॥ ५ ॥
सूत उवाच ॥ ततस्तु तारकं विस्तुत्तरसा शत्रुहारकं ॥ अभ्येत्याहस्मवचनं त्यक्तपंचायुधः स्वयं ॥ १ ॥ अ
हो वलमहो धैर्यं महो सर्वास्त्रशिक्षता ॥ नान्यत्रेनाहृशं किंचिन्मुक्त्वा रुद्रं त्रियंवकं ॥ २ ॥ त्वन्मातैवासुर
श्रेष्ठ सत्यपुत्रवती त्वया ॥ वहुना किं ममागस्त्वं क्षमस्व परया मुदा ॥ ३ ॥ ततः सुप्रीतमनसा विसृष्टैस्तैय
वल्लभः ॥ संभाव्य वहुधा चैनं तारकस्तं निवर्त्य च ॥ ४ ॥ शूरस्य निकरं याति सांजलिः मस्त्रेपेन च ॥
परिरेभे नहाशूरः प्रेमणा चाघ्राय मस्तकं ॥ ५ ॥ ततः सर्वेपि संभूप चक्रवालगिरिं ययुः ॥ हृष्टास्तत्रा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० कृतं दैव्याः स्वर्लोकं संप्रतस्थिरे ॥६॥ मेहेंद्रस्तु तदा कर्ण्य प्रीतः प्रीतस्तदाभवत् ॥ सच्चासरूपपौत्रोऽस्मा
१८ पिकरूपेण श्रीमतः ॥७॥ तस्य निर्गममात्रेण देवेता दिव्यमागताः ॥ आवृत्य सर्वतस्तां तेव व्यधादे
वान् विनिर्गतान् ॥८॥ स्तुत्वा पित्वा तदा स्वर्गं महर्लोकं गतास्तु ॥ तत्र स्थितैर्ब्रह्मर्षिभिः प्रतस्थे
पूजितस्तथा ॥९॥ जनलोकं तपोलोकं भेस्य ब्रह्मसुतेन या ॥ सत्यलोकं गतस्तूर्णं विधात्रा समलं
कृतं ॥१०॥ जगाम मायाविधिः सार्धं देवाभिर्ब्रह्मभिः स्मरागात् ॥ अभ्येत्य ब्रह्म मेवाचवाचा प्रीतस्तदा भृशं एम
११॥ पितामहोऽहं पुत्राणां निवसाम्यत्र सर्वदा ॥ त्वं हि स्वर्गमिदं सर्वं यथैवासुरनायकं ॥१२॥ पुष्करागं १८
मनं वास्यान्मुहूर्तं स्थेयं मतिर्मम ॥ नवानुजानां भूपानां संत्विमान्यापृथानि वै ॥१३॥ ब्रह्मा सर्वं संबंर
दृष्टे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म्यमित्युक्त्वा हान्नदा विधिः ॥ ननस्तु वेधसं प्रः संभाव्य सुतरां इतं ॥१४॥ विष्णुलोकं जगामाथ सहसैन्यैः
सहस्रशः ॥ श्रुत्वा तदागमं विष्णुर्भृत्युक्तं सहसागमत ॥१५॥ कृपयात्र वदैत्येंद्र लोकेस्मिन्निवसेमम ॥ इ
षयमत्र तव पालोकः सम्यक्त्वत्सैन्निवेके मेमम ॥१६॥ इत्युक्तानुतदा दैत्यैरगमस्यत्तनं हरिः ॥ तत्र तत्र
विचित्राणि तेषां संदर्शयन्मुहुः ॥१७॥ पुनश्चासुरवर्यस्य दत्त्वाद्व्याणि भूरिशः ॥ उपचारैर्न दात्यर्थ
मवदन्मधुसूदनः ॥१८॥ ततः सुप्रीतमनसाम्प्ररपघ्नो हरिं तदा ॥ प्रीणयित्वा तिरम्येण वचसा निर्य
यौ स्वगणैन ॥१९॥ शिवलोकं तदा रम्यं जुष्टं रुद्रैः सहस्रशः ॥ गणनाथैस्तदा दैवैर्मुनिभिश्च महात्म
भिः ॥२०॥ प्राकारगोपुरद्दालवलभीभिः समंततः ॥ सहस्रस्तंभयुक्तैश्च मंडपैर्मंडितं तथा ॥२१॥ रुद्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० कन्यासहस्रैश्च नानारत्नविभूषितैः ॥ वीरगावेणुमद्दंगोघैर्भेरीकाहलडिंडिमैः ॥२२॥ नारयावादित्रकुश
१७ लैर्गायकैः किंनरैस्तथा ॥ वेदघोषैस्तरांश्चाथैः सर्वदापरिशोभितं ॥२३॥ हस्त्यश्वरथ्यनरसाहूरतः
संजलितरा ॥ सेनांनिवृत्य सिंहास्यताकाश्चाभवान्वितः ॥२४॥ मेरुमंदरनगाभ्यस्य मनसासं
स्मरं छिवं ॥ महादेवालयं नत्वमहाविभवविस्तरं ॥२५॥ नानारत्नैर्विचित्रैश्च विचित्रितं सुमनोहरं ॥ प्राका
५ रैः परितोरम्यैः सुरम्यं कुनकांचनैः ॥२६॥ अष्टस्वपट्टैश्च तथास्वर्णतोरणनिर्मितैः ॥ विलसद्वृषभै राम
श्चापिनानारिंरसुशोभितैः ॥२७॥ इतस्ततश्च परितो मंडपांतरैरनेकशः ॥ सोपानैश्च तथाकांतं १७
मकालेन्द्रोपलैः क्रमात् ॥२८॥ वीक्ष्यच सुखतामापसा हर्षं नागतरसासुरः ॥ कृत्वाहं इनमस्कारान्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भ्रातृभ्यां सह मोदतः ॥२९॥ भूतत्रिपुंड्रैः रुद्राक्षमालाभिः परिष्कृतः ॥ नंदीश्वरं नंदनाद्दृतं नमथ मंदारमालाश्रि
तं ॥३०॥ भूतिभूषितसर्वांगं रुद्राक्षपरिमंडितं ॥ कर्णकुंडलिकाभ्यां च शोभमानमुखांबुजं ॥३१॥ भूतवेत्रक
रं देवं द्वारपालधुरंधरं ॥ अनेककोटिगणैः परावृत्तं पार्श्वयुग्मतः ॥३२॥ महाभीमैर्महाक्रूरैर्महासंहा
रिकारिभिः ॥ मत्तोन्मत्तैर्महाधीरैर्महाबलपराक्रमैः ॥३३॥ ब्रह्मांडखंडसंहर्तुर्धनवेषैरिवास्थितैः ॥ स
मुद्गरांकुशकोदंडपिंडीवज्रांकितैः ॥३४॥ सुरूपैश्च विरूपैश्च कुरूपैरपरूपकैः ॥ द्विपादैश्च त्रिपादै
श्च चतुष्पादैरपादकैः ॥३५॥ एकपादैस्तथा चान्यैरेकहस्तैर्द्विहस्तकैः ॥ त्रिहस्तैश्च चतुर्हस्तैः सिंह
वक्त्रैर्गजाननैः ॥३६॥ व्याघ्रवक्त्रैस्तथा चान्यैस्तारक्षमुखभीषणैः ॥ मृगाननैः खरास्यैश्च गोवक्त्रै

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शां०सं० र्महिषाननैः ॥३७॥ गोमायुवक्त्रकैः क्वापि ऋक्षास्यैः शिववक्त्रकैः ॥ ह्कवक्त्रैर्दीर्घवक्त्रैः क्वचिद्वक्त्रैः वक्र-
२० वक्त्रकैः ॥३८॥ हृष्टासंपूर्णमनसा प्रणम्य मनसा भृशं ॥ ततस्तु नंदी प्रोवाच भूरप पानमीप्सितं ॥३९॥
महता क्रतुना पूर्वं शंभोः पूजा कृता त्वया ॥ त्वया प्राप्तमभीष्टं च किमर्थं त्वागमस्तव ४०॥ शूरपैंडवा प्र
च ॥ हे देव देवं जगन्नाथं मन्नाथं च विशेषतः ॥ त्वमस्तं नु मयैनतस्मात् किं कार्यं वद मे प्रभो ॥४१॥ तस्मार एम
वसरं मे स्यसेवायै मामन्वयाभुजः ॥ नंदी ततः प्रविश्यांतः परमेशं व्यजिज्ञपत् ॥४२॥ अनुज्ञातस्तदा ते २०
न शंभुना चागतो वसुः ॥ ततस्तु भूरपपोसो नंदिनां तर्दिवेशाच्च ॥४३॥ तत्र तत्र स्थितान्द्वारे गणा
पानसंभ्रमणम्यसः ॥ कृतांजलिपुटो ध्यायन् भक्त्या चांतः पुरं गतः ॥४४॥ ददर्श देवमीशानं महादेवं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रिपंचकं ॥ सत्यज्ञानानंदमयं साक्षात्कैवल्यदायकं ॥ ४५ ॥ ऋतं सत्यं परं ब्रह्म पुरुषं नीललोहितं ॥
ऊर्ध्वज्वलनरेतस्कं अप्रमेयं परात्परं ॥ ४६ ॥ अष्टाविंशतितंत्रैश्च कामिकाद्यैरभिष्टुतं ॥ वेदैश्चतुर्भिश्च
तथा तत्प्रमाणपदांबुजं ॥ ४७ ॥ रुद्रकन्यासहस्रैश्च नानाभूषैः सुंदरैस्तथा ॥ गणैलसद्धवल[illegible]चाम
रासक्तपाणिभिः ॥ ४८ ॥ भृंगिजन्मंजुलनादैर्नंदनाद्यैश्च समंततः ॥ मुण्डैः सरूपैश्च तथा त्रिने
त्रैः कालकंधरैः ॥ ४९ ॥ कुंभेन च निकुंभेन गणैश्च महात्मभिः ॥ सनकमुख्यैश्च ऋषिभिः से
वितं परमेश्वरं ॥ ५० ॥ प्रणाम करदा प्रीत्या भक्त्या प्रस्तुत सानुजः ॥ नमस्ते तु महादेव सृष्टि
स्थित्यंतकारिणे ॥ ५१ ॥ भक्तवत्सल विश्वेश विश्वरूपाय शंभवे ॥ शिवाय भीमरूपाय शांतरू

जीर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० पापशंकर ॥ ५२ ॥ सां चापि तेन सोमाप्य सपुत्रा पत्न सोमनमः ॥ गंगाधरप्रभर्गिण्यसामान्यकैवल्यमिंदिरा ॥ ५३
२१ मुहस्फाटिकसंकाशामूर्त्तेय ब्रह्मरूपिणे नमः ॥ इति स्तुत्वा स्थिता तत्र प्रसन्नेनेन हासुरः ॥ ५४ ॥ ततस्तु
देवदेवेशः शैलादिं प्राह शंकरः ॥ मद्भक्तः सूरपदोसो ऽऽह कुंडानि विज्ञानिसः ॥ ५५ ॥ महाऽत्रपाद्गत
स्तेषु पालकान् परिकल्पय ॥ निवसंतोस्मिन्नं मध्ये वसन्तं वस हानुजैः ॥ ५६ ॥ इत्यादिष्टो भगवता
नंदीश्रीवाचनं द्विजाः ॥ सूरगणस्य कोणानि कुंडानि च पालकान् ॥ ५७ ॥ परिकल्प्य वसंतोस्मिन्नदि एम
ह भ्रया ज्ञात्र शांभवी ॥ सूरस्तु तस्मात् देवं शंकरं लोकशंकरं ॥ ५८ ॥ प्रणम्य च पुनः साकं भ्रातभ्यो २१
निर्ययौ स्वगणान् ॥ नंदीश्वरं नमस्कृत्वा मयाम हारमाश्रितं ॥ ५९ ॥ अनुज्ञातस्तु तेनाम्बुसेनामा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पीनजांतदा ॥ इति श्रीशंकरसंहितायां आसुरकांडे षष्ठोऽध्यायः ॥ ६ ॥ सेनयासहितः शूरः मतस्येंद्रमन्वेषि
तुं ॥ असंख्यभिर्जितरसामापरद्वैरुष्मपालितं ॥ १ ॥ ततस्तु रुद्रास्तत्र दूतसेनयाचागतं तदा ॥ शिवाज्ञयाचतत्
स्यामुमुमुत्रुःपदवीनिर्जा ॥ २ ॥ वहिष्कांडस्यतेपाताः सर्वैपिकिलकिंकरैः ॥ तेषुतेषुतदातूर्णमंडे
ष्वैतेमहौजसः ॥ ३ ॥ गत्वाचैवंविजित्वाग्निपालकंस्यापयनत्रच ॥ भुक्त्वाचविविधाभोगान्निर्ययुः
सहसासुराः ॥ ४ ॥ एतद्दृष्ट्वातदासर्वे स्मरणादेवगताः किल ॥ विज्ञापचागमंतेषां रुद्रास्त्वध्यधिपास्तदा
॥ ५ ॥ व्रतलांछभिर्जितंछित्वैवयथामांगंदुर्दुर्द्दिनाः ॥ ततस्तुशूरपद्मासौअंजसाद्विवमागतः ॥ ६ ॥ व
लैर्नानाविधैस्तैर्धावद्भिश्चपरस्परं ॥ अथासुरेंद्रस्तरसाभुक्केलौनेसहापसः ॥ ७ ॥ मातामहःश्री

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं० सं० णवलोहि देवैः पूर्वैरसुराणां गरिणे ॥ श्रुत्वैकेण वचस्त्वं वधुत्वमस्मिन्मो वाचवंडितः ॥ ८ ॥ ततः स्मरस्तु देवस्यानेगु
२२ रु देवस्यैं इमेवच ॥ नत्वा संपूज्य बहुधा मीस्मावचपरायानहा ॥ ९ ॥ हिमजं पंचवनयोः षुणमनं चाब्रवी
नयोः ॥ ताभ्यां तु सहितस्तत्र गौभ्रातनमिस्त्र वलेश्वरः ॥ १० ॥ जगामभूतस्तं स्मरपत्रासौ मदनमुत्र
त्तः ॥ तछ्रुत्वा तु ततो देवा विस्मुल्लोकं मनः स्त्वता ॥ ११ ॥ आजम्मुस्ततरसाग्नमा भम्रमेनरुपान्विताः
॥ दृष्टा च विस्मं मोचुस्ते जना देनमगिरीश्वरं ॥ १२ ॥ रक्षणीयास्त्वया देवा देवस्थोभीतमानसाः ॥ इत्यु एन
क्तास्मस्रयानम्रान्देवान्मोवाचमाधवः ॥ १३ ॥ अहो देवा व पाकिं वा पतं तेन मूढबुद्धयः ॥ इमा २२
धे रमता देवं राजानं चाध्वरस्यते ॥ १४ ॥ हित्वा पूर्वं मया मार्धं हविर्भाजस्थिताः खलु ॥ तदानीमेवत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यांहंफलमस्माभिरत्रच ॥ १५ ॥ भोक्तव्यंपुनरन्यच्चान्तस्मापस्यफलंध्रुवं ॥ तस्माद्दैत्यवरः शूरः श्रीगणनीयो
महासुरः ॥ १६ ॥ इत्युक्त्वाथवेधोसार्धंत्रयस्त्रिंशद्विरंजसा ॥ कोटिदेवैस्तदाशूरंसामाम्नात्यगात्स्वयं ॥ १७
शूरपमानमध्येत्याविलुर्भस्मुवेचोब्रवीत् ॥ कुमालंतेसुरश्रेष्ठभ्रातृभिः सहसैनिकैः ॥ १८ ॥ रक्षितास्त्रि
तसंधापगद्गुणाभीषणपच ॥ एतावत्कालपर्यंतंइयथातेस्थितोस्म्यहं ॥ १९ ॥ ततस्तुशूरपद्मोसौ
श्रीगणिपत्वाहींतदा ॥ देवानांमध्यतोरुद्रान्नव्हनेदक्षूमितोनसः ॥ २० ॥ एतेकेवारुद्ररूपात्रिहिमेवांसे माध
वाधुना ॥ त्रिनेत्रानीलकंठाश्चकिमर्थंदेवमध्यगाः ॥ २१ ॥ विष्णुरुवाच ॥ पुरुब्रह्माजोपुक्तोवधारं
कारगर्वितः ॥ अहमेवजगत्कर्तासंहर्तापालकस्तथा ॥ २२ ॥ विष्णुस्त्वाशिवलीलांसोमहामायावि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० मोहितः ॥ ततस्तु सर्षिसामर्थ्यं गतमस्य शिवाज्ञया ॥ २३ ॥ अहो मेऽत्र मनस्तामसं या किं वा विवेष्टितं ॥
२३ शिवस्य मायापादुर्लंघ्या सर्वसंमोहकारिणी ॥ २४ ॥ यस्मान्निर्विवं महादेवं ममकर्तारमव्ययं ॥ अविज्ञा
याखिलांशनं मच्छ्राहिकारणोपमं ॥ २५ ॥ अहंकृतेनमयास्वर्थं प्राप्तमेतन्मतं ध्रुवं ॥ इति चिंतापरव
शो भूमध्ये सांबमीश्वरं ॥ २६ ॥ त्रिनेत्रं नीलकंठं च प्रसन्नवदनपंकजं ॥ कुंदमंदस्मितमुखं मुक्ताहारम
विराजितं ॥ २७ ॥ कोटिसूर्यप्रतीकाशं प्रभुं पीठासने स्थितं ॥ ध्यायंतास्तेम शं शंभुं सच्चिदानंदविग्रहं ॥ राम
२८ ॥ ततः सुप्रीतमनसा हृष्टो नेकादशेश्वरः ॥ विनिर्गतः पद्मनाभस्य हृद्भूमध्ये ब्रह्मणः स्मरणात् ॥ २९ ॥ २३
प्रादुर्बभूव तस्मान्न ब्रह्मा प्रणम्यो वा व भक्तितः ॥ के यूयमागतास्त्वत्र किमर्थमिति विस्मयाद्दृक् ॥ ३० ॥ वि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नियुक्तावयं रुद्राः सृष्ट्यर्थं नेधुना विधे ॥ शंभुना देवदेवेन मामास्तस्मान्नवांतिकं ॥ २१ ॥ ततस्तु रुद्रानमो
वाच ब्रह्मा रुद्ररूपापराः ॥ युष्माभिरेव कार्यास्तासृष्टिः सर्वैः स्वात्मरूपा ॥ २२ ॥ तच्छ्रुत्वानु ततो रुद्रा ब्रह्मणो
वचनं तदा ॥ अकुर्वन् रुद्रसृष्टिं ते प्रत्येकं कोटिसंख्यया ॥ २३ ॥ रुद्रानवहूंस्तदा रुद्राः सृष्टान् रुद्रैर्महा-
त्मभिः ॥ आवर्त्तनु जगज्जालं रुद्रैरप्रजापतिः ॥ २४ ॥ अहं मे षा महात्मानो रुद्राणां सृष्टिरीदृशी ॥ ल
इतः परं न मैथैवं क्रियते पुष्म हाज्ञया ॥ २५ ॥ इत्युक्त्वा सहितैर्ब्रह्मा रुद्रैकादशकैस्तया ॥ तदुमूर्तेश्च रु-
द्राणामेकादशककोटिभिः ॥ २६ ॥ रुद्रलोकं जगामाशु नानाविभववीरं ॥ तत्र गत्वा महादेवं नंदिवा-
रं व्यजिज्ञपत ॥ २७ ॥ नंदिना तु सहाहूतो विवेशांतः पुरं विधिः ॥ तत्र दृष्ट्वा महादेवं लोकानुग्रहकारकं

स्त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०वे०सं० ३८॥ मरणम्य हं ३ व ह्मोत्तुत्वाच वद्रुभिस्त्तवैः ॥ स्थितस्तु देवदेवेन पद्मः स्वस्थानिवेन सः ॥ ३९॥ किमर्थ
२४ मागतस्त्वेति प्राह वाचं भयान्वितः ॥ स्वाज्ञानदोषं हर ज्ञात्वा मागमं च क्षिवाज्ञया ॥ ४० ॥ रुद्रः संक्षिप्य वं ह्
तोऽस्तत्क्षणी मे व मा गेह के ॥ ततस्तु तं महेशानः प्रेम्णा पुस्त्ता बुजाक्षिराः ॥ ४१ ॥ अत्र प्रभृति सर्वस्थित्यं कुरुष्व
त्वं न मदाज्ञया ॥ अवलेपं विमुक्तं के वपध्या पूर्वं त्वदेहि ना ॥ ४२ ॥ रुद्रा नेकार्णवतान भुवनं स्वमचोर एम
यत ॥ सुरेश्वकार्णवस्य कोटिरुद्राणकस्मयत ॥ ४३ ॥ नैः सार्धं देवताकोटिप्रस्तुपरिनिः शान्तमिताः खलु ॥ २४
अस्मानुदेवमीशानं नमस्कृत्वास्थितिं गतः ॥ ४४ ॥ इत्थं मे मूर्त्यरूपस्यांर रुद्राः प्रोक्तामयाधुना तच्छ्रुत्वा
मूर्तपक्षासो हरद्वारस्थां स्थिम दुतां ॥ ४५ ॥ श्रीनिमापानुलाभ्रानसे निकेमीधवेनसः ॥ ततस्तु मूर्तपयोयंस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रंभुकेरणचोदितः ॥ ४६ ॥ लवणाब्धौ नदीरम्यां त्वष्टाकारपरिष्कृतां ॥ पाश्चे क्षीतिसरस्वत्याः एंयोजनानां
विशेषतः ॥ ४७ ॥ शतयोजनविस्तीर्णां वीथीयुक्तामनेकशः ॥ प्राकारपरिखाभ्यां च मेखलाभ्यामि
वावृतां ॥ ४८ ॥ चतुर्द्वारमहोच्छ्रायगोपुरमंडिताननः ॥ अंतःस्थचतुरास्थूलरथ्यानुरेखैतीमिव ॥ ४९ ॥ घना
वापीकूपतटाकैश्च कासारैः परितो वृतां ॥ चतुर्दिक्षु स्थितोद्यानषंडकाननमंडितां ॥ ५० ॥ नारीकेलाम्रप
नसपाटलीमधुकैस्तथा ॥ अशोकपूगीहिंतालनतालनारंगमातुलैः ॥ ५१ ॥ जंबूपनसनिंबैश्च शाल्मली
पारिजातकैः ॥ कुद्दालवटमंदारबकुलाम्लत्यनिंबकैः ॥ ५२ ॥ जंबीरबीजपूरसलोध्रराजासनै
स्तथा ॥ शिरीषश्रीफलांकोलकुलकागरुचंदनैः ॥ ५३ ॥ तिंत्रिणीवारणद्राक्षककुभायुग्मपत्रकैः त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० मालतिलकाद्यैश्च शतशः परितो वृतं ॥ ५४ ॥ वल्लभ्य हाल्लकैर्मैश्च सोपानावलिराजितैः ॥ आलिंद
२५ देहलीनीध्रजालैश्च मनोहरैः ॥ ५५ ॥ गर्भहर्म्यशिखाग्रैश्च वितैः शतशोप्यसहस्रशः ॥ मध्ये चास्य
गर्भहंतस्य हर्म्याद्योजनसंख्यया ॥ ५६ ॥ इति श्रीशंकरसंहितायां आसुरकांडे सप्तमोऽध्यायः ॥ ७ ॥
सूत उवाच ॥ सहस्रारांगनद्वारम्यं प्राकारपरिवारितं ॥ चतुर्भुद्वारदेशेषु महागोपुरभूषितं ॥ १ ॥
अनेकांगणसंयुक्तं प्रासादसुमनोहरं ॥ वेदिकाशतसंछन्नं स्फाटिकोपलनिर्मितं ॥ २ ॥ निश्रे एम
णिकायुतैश्चित्रैर्नानाद्रिसुख्यश्च स्थितैः ॥ भित्तौ नानाविधैश्चित्रैश्चित्रितं सर्वतोभद्रं ॥ ३ ॥ क्री २५
डापर्वतसंघैश्च वापीजालैः समंततः ॥ ४ ॥ कूपैरनेकशास्त्रतनयुक्तादिभिरावृतं ॥ ५ ॥ आरामवं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दैश्चानघासर्वर्तुकुसुमोज्वलैः ॥ प्रमदावनखंडेन मंडितं परितस्तथा ॥ ५ ॥ यागशालासहस्रेण राजि
तं सर्वतस्त्वपि ॥ भोगशालाभिरन्याभिर्नागशालाभिरावृतं ॥ ६ ॥ पाकशालाशतेनापि विशालेन स
मंततः ॥ भूषणानां च शालाभिः पुष्पशालाशतैस्तथा ॥ ७ ॥ अस्त्रशालाभिरन्याभिर्गानशालाभिरा
वृतं ॥ विद्याभोजनशालाभिर्गजाश्वानां तथैव च ॥ ८ ॥ आस्थानमंडपानां च राजिभिः परिशोभितं
॥ देवासुरमहानां च मंडपानां मंडपैस्तथा ॥ ९ ॥ एकांतमंडपैश्चापि नानारत्नविचित्रितैः ॥ मुक्तावि
रचितैरन्यैर्मंडपैः सुमनोहरैः ॥ १० ॥ प्रवालमंडपैश्चापि चारुतेजोज्ज्वलैस्तथा ॥ वैडूर्यरत्नरचितै
र्वैडूर्यमंडपैरपि ॥ ११ ॥ पुष्परागैः शुभैश्चापि रचितैः शुभमुज्वलैः ॥ पद्मरागैरनेकैश्च तेजोराशि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० विद्रुमितैः ॥९२॥ तथामरकतैस्तत्रपद्मरागिजालपरीक्षितैः ॥ इंद्रनीलैश्चभूयोपिज्ञातसर्वदोषविवर्जितैः
२१ ॥९३॥ वज्रोपलैरनर्घैश्च हेमैस्तैर्मनोहरैः ॥ मुक्ताफलैःकेसंवैद्यैश्च गोमेदकमिलाचितैः ॥९४॥ ह
रिचंदनवृक्षौघैः सुगंधैर्विविधैश्चितैः ॥ रत्नमालाभिरम्यैश्च मंडपैश्चारुमंडितैः ॥९५॥ इतस्ततश्च
परितः सुकृतैः सर्वशोभितं ॥ अनेककोटिमाणिक्यरत्नचितंनवमंनवं च ॥९६॥ पताकाभिर्गताका
शपद्वीभिस्तदाभृशं ॥ व्याप्तवन्नागलोकस्य स्वर्धेवसमंततः ॥९७॥ मुक्तामाणिक्यरत्नैः एम
चितकपाटैश्च सहस्रशः ॥ नानाहारैःकिंकिणीभ्यांतुनर्तकैश्चाम्भोजनाभुजं ॥९८॥ कारयित्वानिरम्ये २१
रम्यपुरेनामचकारसः ॥ वीरमाहेंद्रशाकेनमहितंभुवनत्रये ॥९९॥ पुराणितस्याः परितश्चित्राणप

भाग्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षेतदासुरः ॥ हैमारंभं च पुरं तद्दैवाभिधमतः परं ॥ २० ॥ लंकापुरं परं तद्वत्कारयामास पंडितः ॥ ए
नद्रु वं मुक्तरसिंहभागे समुद्रस्य तदासुरः ॥ २१ ॥ आसुरारंभां पुरीं रम्यां सर्वरत्नविचित्रितां ॥ तथा दक्षिणतो
मेरोर्द्वीपे जंबुद्वीपे पुरं ॥ २२ ॥ हेमकूटाद्रिनिकटे मायारंभं सुमहद्दृढं ॥ द्वीपे द्वीपे च नागानां मध्यावध्योच स
र्वतः ॥ २३ ॥ कारयामास बहुशः स्थानानि यामलासुरः ॥ ततस्तु वीरमाहेंद्रपुरमापतदासुरः ॥ २४ ॥ इंद्रकु
तं च विचित्रांशिल्पकर्मेरणगंरभाविप्रात ॥ ततो गत्वासुरश्रेष्ठः सहविद्याधरैर्वृतः ॥ २५ ॥ आत्मनिर्मित
दानवं सिंहासनमधिष्ठितः ॥ ब्रह्मात्मतस्य मुकुटं शिवमायापदत्तवान् ॥ २६ ॥ पट्टाभिषेकं च तदा च का
रयन्निमान्तसुरैः ॥ ततस्तु सर्वे दैत्येंद्राः संतोषं मापुं जसा ॥ २७ ॥ पदहुंते मयाविश्वोत्तहागच्छाधुनाव्रज ॥
तो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रं० सं० दिव्यास्त्वं च नदेशानमेकादशककोटिकान् ॥ २८ ॥ रुद्रानेवं विमुच्यैकं सिंहास्यं नारकं तदा ॥ निवेदयित्वा
२७ देवानां मत्स्यकं कार्यमात्मनः ॥ २९ ॥ तांबूलं कल्पयाञ्चक्रे तु पुरुहूताय दक्षिणा ॥ अग्नेर्यमस्यापितनयापा॰
नीयं च समादिशत् ॥ ३० ॥ अंगारपात्रं निर्ऋतेर्ज्वलनं वरुणस्य तु ॥ वायोश्चामरकं चैव धनदस्य तथासुरः
३१ ॥ पृष्ठभङ्गं तथा चक्रं स्तूर्घेशे पोष्ठदमेव च ॥ असौ तेऽद्य स्वपत्तं चदान्तानुसुमनोहरं ॥ ३२ ॥ सिद्धविद्याधर
गन्धर्वैः किंनरैरुरगैर्दैत्यैस्तथा ॥ तपसामात्रश्चपरीतो नानानागानविमारदैः ॥ ३३ ॥ रंभोर्वशीमेनकाभिर्नर्तस्तुतिः एम
सेवितस्तथा ॥ एवं सिंहासनारूढो देवांश्चरितस्थितान् ॥ ३४ ॥ प्रेतस्य पुरोमरुत्त्वं तेनतदामातासुरेश्व २७
रः ॥ दैवैः सहमहीपेत्त्वं पुरोधैर्व्योमिन्नःक्षितिं ॥ ३५ ॥ कुरुविनिस्तंभयामोदेव विमुच्चाहं क्षितिं तथा ॥ अग्नि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

माहत्तहाम्रो हैस्तैः स्तुषेऽपि पावकः ॥ ३६ ॥ माहेहेसिनयानेयं पाकं कृत्वा पुरे वस ॥ यमत्वं दांतरूपेण
प्रेष्यः सर्वैर्हितैः स्तुतैः ॥ ३७ ॥ निवसात्रतयानेषां विधानं चाप्यकारय ॥ वरुणेन त्वया पीतगंधो हैनेवसे
वितं ॥ ३८ ॥ महाकार्यमहीयेस्मिन्पवनेनेसावधानतः ॥ मेहंमेहं त्वया वायो वातअंगंधपीतलैः ॥ ३९ ॥
हिमांशुर्विंदुम्निनिस्यं मुग्धनारीकुचे ह्रिपन ॥ नयात्तं मार्जनं चापि कृत्वा भीतेन सर्वतः ॥ ४० ॥ त्वं कुबेर रह
रक्षं भहानां पहपेहितं ॥ हंत्वपद्मनिधिं भीत्वा सर्वहासावधानतः ॥ ४१ ॥ गोपुरद्वारेहेशे त्वं स्थित्वा स्
पीतपंकुर ॥ अघमेघमेपवत्ताभूषपन्नेगनामम ॥ ४२ ॥ पीतं प्रभुना त्वया पूर्णिकलायुक्तेन सर्वहा ॥ मन
स्विनीमनेभित्वाकार्यामेनमेहूतता ॥ ४३ ॥ वक्त्याहितमुद्दिश्य त्वयाब्रह्मन्विशेषतः ॥ सहपुत्रैश्च रक्षा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं० सं० कैः प्रजापतिभिरेवैते ॥ ४४ ॥ एवं नानाविधानं सर्वैर्वानेव नुतिष्ठ ॥ सोत्काकार्दविश्वेषुगणत्वयो लिंहासनेस्थि
२९ तैः ॥ ४५ ॥ मुकुंदेण गुरुणा चापि ब्रह्मणोपि स्मतसमन्वयुक्तैः कैः ॥ प्रतिदिनमितिदेवैरिंद्रपूर्वैर्वरोपरि जितनय
समूहे सूरपद्मोसपत्नैः ॥ क्रतुनिजकार्ष्णिसंघः संनतं सार्वभौमः समधिगतबहुश्रीभिर्नमितस्सुरेंद्रैः ॥ ४७
इति श्रीशंकरसंहितायां आसुरकांडे अष्टमोध्यायः ॥ ८ ॥ सूत उवाच ॥ ततस्तु सूरपद्मोयं त्वष्टुः कन्यां म
नोहरां ॥ उद्वाहयद्विशेषज्ञः पद्मकोमलकान्तिहा ॥ १ ॥ चत्वारस्तनयास्तस्याः संबभूवुर्बलोत्कटाः ॥ भा एम
नुकोपाभिरुः कश्चित्तथाग्निमुखएव च ॥ २ ॥ हिरण्यनामा च पुरो वज्रबाहुस्तथेतरः ॥ देवकन्यास्त २९
था वह्निरसुराणां च कन्यकाः ॥ ३ ॥ राक्षस्योपि तदा सूरो गंधर्वाणां च कन्यकाः ॥ सिद्धविद्याधराणां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वनागानामपिकन्यकाः ॥४॥ उद्वाहयत्तदापुत्रांस्तासुवीर्यवलान्वितान् ॥ त्रिसाहस्रमितंशीघ्रमजीजन
दहोद्विजाः ॥५॥ सिंहाननंतारकंचकोटिद्विपवलैःसह ॥ प्रत्येकमाप्नुतौवीरावासुरस्येपुरेक्रमात् ॥६॥
मायापुरेचमहतिप्रेरयामासवीर्यवान् ॥ तत्रगत्वानुसिंहास्योपयाम्यांकन्यांविभूतिकां ॥७॥ उद्वाह्यपुत्रं
तस्यांसमहाशूरमजीजनत् ॥ एवंकन्याविवाह्यापंचशतंपुत्रानजीजनत् ॥८॥ तारकोपितथाकन्यां
निर्जितांसैरिकांतदा ॥ असुरेन्द्राभिदंपुत्रंधर्मासक्ताशयंभृशं ॥९॥ उपायंसपुरेरम्येरममाणोवस
त्तदा ॥ पुनश्चशूरपद्मापंप्रतिद्वीपंतदासुरान् ॥१०॥ द्विकोटिगणितांश्चैववाहिन्याप्रेरयत्किल ॥ पाता
लभूमिनाकेषुवाहिन्यांगणितांस्तथा ॥११॥ षट्कोट्याबहुधाभिन्नानसुरान्विनिवेशयत् ॥ वीरमाहेंद्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० पुर्यास्तु श्रीनोपपुरे स्वयं ॥१२॥ गजाननेनं तु रंगास्यं प्यात्न्वक्रेन चोन्नरं ॥ भक्तकवक्रेचपरं भाग्यवक्रंम
२९ त्नावलं ॥१३॥ वरारमुख मन्यं चसिंहवक्रं तत्वोन्नरं ॥ गजपास्यमिमानर्वेभमहावीरन्महौजसः ॥१४॥ अ
शीतिवाहिनीभिस्त्वान्नसहस्राणांनिवेशपन् ॥ स्वपुरे पिनद्याम्नोवाहिनीनां चलक्ष्सकं ॥१५॥ वलंतथा
गोपुरेषु प्राकारे स्वेवमाहिषु ॥ स्थापयामास सूरेभ्यं दह्नबलमपराक्रमान् ॥१६॥ दुर्गेणं वमितोपं चदुर्मु
खंकंरवपालकं ॥ वक्रंपलेचमर्मेनं महिषारव्यं चमंत्रिणः ॥१७॥ कृत्वाप्सूरस्तुतैः सार्धं राज्यभारंतदा राम
वहन् हेरंदेवं हमुख्योप्स्वकरुणपम्मनपाधनाः ॥१८॥ भूरिसिंहासनं तन्वाररुंचविहिने हिने ॥ तस्तुचा २९
नमंत्रिणाप्सापि हृष्ठानेप्स्रोहिताः क्रियाः ॥१९॥ कृत्वातस्तु महाभीतागरुंप्पन्नगाः स्वं ॥ कदाचिद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

७७॥ पूर्णकुम्भान्समादाय ऋषयोग्रे समागताः॥ एवं नानोपचारेण वीथीमुल्लंघ्य षण्मुखः
॥ ७८॥ मरुत्वतो गृहद्वारवीथीमापामरैः सह॥ तदा सरस्वती लक्ष्मीमुखा देववरस्त्रियः॥ ७९
॥ नीराजनक्रियां चक्रुरष्टमंगलकान्यपि॥ प्रदक्षिणात्रयं कृत्वा विविशुर्भवनांतरम्॥
८०॥ ततस्तु भगवान्देवो मयूरादवरुह्य सः॥ कल्याणशालानिकटमाप मंगलसंरवैः॥
८१॥ तदा समागतादेवीशाकस्य परया मुदा॥ अप्सरोभिर्गुहं नत्वा क्षीरैः पादावपूजयत्॥
८२॥ आनर्च्य पुष्पैर्दिव्यैः साकत्वा दीपावलीं मुनः॥ प्रदक्षिणप्रणामानि कृत्वा भवनमा
पसा॥ ८३॥ सुवर्णपादुके रम्ये नानारत्नविचित्रिते॥ धृत्वा गुहः शनैर्देवो ययौ कल्याणम
ण्डपम्॥ ८४॥ समारुरोह तत्रस्थं दिव्यं सिंहासनं मुनः॥ विष्ण्वादिदेवास्कंदस्य नियोगात्स्वास
नानि ते॥ ८५॥ भेजिरे मुचुकुंदाद्याः प्रणम्यांजलिपाणयः॥ वीरबाहुर्मुखा वीरा विदध्युर्गु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰सं॰ ६

हसत्क्रियाम्॥८६॥एवंनानोपचारेणपूज्यमानःसुरेश्वरः॥अथनिरगमदीशःस्यंदनेनमो
मयानेकनकमणिविचित्रेसार्द्धमद्रींद्रपुत्र्या॥वियतिपरिविभुद्धवाद्यघोषैरनेकैर्जित
घनघनरावैरास्थितोद्रुतमेतत्र॥८७॥इतिश्रीशंकरसंहितायांदेवकांडेप्रथमोध्या
यः॥१॥सूतउवाच॥तत्रदृष्ट्वामहादेवंसमुत्थायगुहादयः॥प्रणम्यपरयाभक्त्यातुष्टुवुर्वे
द्धपारायणः॥१॥अथवरूथविमाना त्स्वान्निरगादेवयाशिवः॥ततोगुहःपुरतोगत्वापार्वतीप
रमेश्वरौ॥२॥प्रण म्यपादयोर्मूर्ध्नातुष्टावविनयेनसः॥समालिंग्यगुहंशंभुःसमाघ्राया
स्मृतच्छिरः॥३॥तत्पिंनापतदात्यंतंपुनःपुनरहोद्विजाः॥विष्णुब्रह्मादयोदेवानत्वादेवंत्रि
यम्बकम्॥४॥अस्तुवन्विविधैस्तोत्रैर्वद्धांजलिपुटास्तदा॥कृपयातान्विलोक्येशःप्रा
पकल्याणमराडपम्॥५॥अनुसृत्यसुराःसर्वेपरमेशंतदागताः॥तत्रसिंहासनंदिव्यमाग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तंतच्छिवाज्ञया॥६॥ अलंचकार तद्देवः परमानंदविग्रहः॥ सुब्रह्मण्यं महादेवः स्वांकमारोपयत्त
दा॥७॥ प्रणेमुरम्बिकानाथं ससुतं सकलाः सुराः॥ त्वदाज्ञया गुहः स्वामिन्‌ हत्वा दैत्यान्‌ सुर
द्रुहः॥८॥ मोचयित्वामरान्‌ बद्धानागतो ऽत्र पराचले॥ प्रीतये षण्मुखस्यायं मरुत्वान्‌ स्व
सुतामिह॥९॥ पाणिं ग्राहयति स्वस्याकुलस्योद्धृतये प्रभो॥ एवं प्रणम्य देवेशं ब्रह्माहऽज्ञांत
मुक्तवान्‌॥१०॥ तदंगीकृत्य शिरसश्चालनेन महेश्वरः॥ द्रुहुमभ्यागतो ब्राह्मं कल्याणमि
तिचावदन्‌॥११॥ पुरंदरं तदा विष्णुरानयात्र सुतां तव॥ कल्याणवेषां परमां जगादेवं
द्विजोत्तमाः॥१२॥ गत्वामरेश्वरः शीघ्रादानिनात्मजां तदा॥ कल्याणमण्डपे लक्ष्मी या
वाणीभ्यां सह सुंदरीम्‌॥१३॥ समुत्थाय ततो देवाः प्रणेमुस्तां वराननाम्‌॥ पार्वतीप
रमेशानौ श्वशुरौ प्रणनाम सा॥१४॥ अवलोक्य तदा लज्जामापषण्मुखमग्रतः॥ त

दानींपार्वतीनाथःकृपांचक्रेवलोक्यताम्॥१५॥करेणामृश्यतामेनांगौरीसंचुंब्यगण्डयोः॥कृपया
वीक्ष्यदेवेशीजगतांजननीस्नुषाम्॥१६॥स्वपुत्रंचासनेसैंहेस्थापयित्वागतास्वयम्॥एका
सनस्थितावेतौदेवसेनागुहावुभौ॥१७॥वीक्ष्यसर्वेसुरास्तत्रसंतोषंप्रापिरेतदा॥चकारषण्मु
खस्यार्घ्यपादप्रक्षालनंशुचिः॥१८॥शचीपाणिस्थभृंगाररजलैरिंद्रोविनिर्गतैः॥अभ्यर्चनं
दनैःपुष्पैर्धूपदीपादिभिस्तदा॥१९॥कृतनानोपचारौघैःपादोदंपावनंतदा॥कुत्रचित्स्थाप
यामाससंवीकर्तुंतदनंतरम्॥२०॥जलमादायहस्तेनगुहस्येयंकुटुंविनी॥इतिब्रुवंस्तदाधारां
चकारमघवान्द्विजाः॥२१॥ततोमंगलसूत्रंचसंपाद्यमनसाविधिः॥प्रादाद्गुहकराब्जेनस्वे
च्छामंगलहेतवे॥२२॥ववंधदेवसेनायाःकण्ठेतंदेवनायकः॥सुगंधिकुसुमस्रग्भिःपुनः
कण्ठमभूषयन्॥२३॥ततःपुरंदरःपुत्रीजामात्रोःसुरसायनम्॥अमृतंफलमन्यच्चनि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वेद्यमकरोत्सुधीः॥२४॥वाद्यघोषस्तदात्यंतंबभूवघननादवत्॥आशीःप्रयुज्यतत्रस्यातु
ष्टिमापुस्तदाम्बशम्॥२५॥जुहावसमिधेनाज्याहुतिभिःपावकेतदा॥प्रदक्षिणार्चि
षविधिर्विधिनाब्राह्मणोत्तमाः॥२६॥ततःप्रदक्षिणीकृत्यवह्निंस्कंदस्वयंप्रभुः॥पा
णिनारोपयामासपत्न्याःपादंतदाश्मनि॥२७॥ददर्शतुस्तदात्वेनौदम्पतीतामरुंधती
म्॥ततोमहेश्वरंगौरींपितरौजगतामुभौ॥२८॥त्रीणिप्रदक्षिणान्यत्रकृत्वाने
मतुरंजसा॥स्थापयामासतुर्गौरीपरमेशौनिजासने॥२९॥समालिंग्यसुषांपुत्रंक्र
पादृष्ट्याविलोक्यतौ॥अथविष्णुमुखादेवामद्रुसिंहासनस्थितान्॥३०॥प्रणम्य
तुष्टुवुर्भक्त्यादृष्ट्वातान्लोचनप्रियान्॥अनंतंधतुरंवेशौतदानीमेवभूसुराः॥
३१॥अप्राश्चर्येणततोदेवाःस्तोत्रंचचक्रुरुमेशयोः॥तदानीम्भार्ययासाकंस्वालयम्प्रा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० पषरामुरवः॥३२॥ग्तुरावन्मंगलवाद्यानिस्तोत्राणिविविधान्यपि॥द्वारिस्थित्वासुरान्सर्वा
८ न्प्रेषयित्वागृहंप्रति॥३३॥द्वारपालान्गृहद्वारिकल्पयित्वातदाप्रभुः॥विवेशगन्तःपुरं
रम्यंभार्यादत्तकरोद्विजाः॥३४॥देवसेनागृहीतत्रतस्थतुपरयामुदा॥मुचुकुन्दमुखान्भू
पान्देवानन्यानृषीश्वरान्॥३५॥यथायोग्यंसुपूज्यांस्तान्पूजयित्वापुरंदरः॥वा
सोभिर्भूषणैर्दिव्यैःकल्पवृक्षसमुद्भवैः॥३६॥वासदोषविनिर्मुक्तैःमणिभिर्हारकंक
णैः॥तोषयित्वायथान्यायंप्रेषया मासतान्द्विजाः॥३७॥शच्यासहतदासोयंस्व
गृहेन्यवसन्मुदा॥स्थित्वात्रकतिचित्कालंसुब्रह्मण्यस्त्रियासह॥३८॥पट्टाभिषेक
ति मिंद्रस्यकर्तुंस्वर्गे म्प्रैंद्रंतम्॥प्रतस्थेस्वगृहद्वारिसर्वदेववरोद्विजाः॥३९॥तदाप्रत
स्थुर्भृत्तानिर्वीराःसेनाधिपास्तथापि॥चक्रुःकोलाहलारावान्पटहानांमहारवैः॥४०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तच्छ्रुत्वा मघवान्ब्रह्मा हरिरन्ये सुरोत्तमाः ॥ सर्वेपि मिलितास्तत्र गुहधमान्निकेतदा ॥४१॥ ततो मनो
जवं रम्यं रथमारुह्य षण्मुखः ॥ प्रतस्थे सकलान्देवान्कृतस्तोत्रप्रणामकान् ॥४२॥ निजासना
न्यधिष्ठातुमुक्त्वा देवाः क्षणाद्द्विजाः ॥ गुहाज्ञया ततो देवा वाहनेषु व्यवस्थिताः ॥४३॥ निकटं दे
वदेवस्य पुरतो भक्तिसंयुताः ॥ वाद्यानामारवो धासीत्प्रलयांबुदनिस्वनः ॥४४॥ निर्ययुश्छत्रिणः
केचिद्ध्वजिनः शुभ्रचामराः ॥ एवन्निर्गत्य देवेशः प्रापायममरावतीम् ॥४५॥ विदग्धामग्निना
शून्यां दृष्ट्वा तां पार्वतीसुतः ॥ सुरतक्षाणमन्वीक्ष्य कुर्वेनां पूर्ववत्क्षणात् ॥४६॥ इति प्रोवाच भ
गवान्करुणामृतसागरः ॥ निर्ममे स तथैवाशु पुरीं सर्वसुरालयाम् ॥४७॥ तदा विष्णुमुखा
देवास्त्वष्टारं शिल्पिनां वरम् ॥ तोषयामासुरत्यन्तं मृदुवाग्भिर्महीसुराः ॥४८॥ तेन साकं सुरा
गत्वा गुहमेतद्व्यजिज्ञपन् ॥ श्रुत्वा तद्वचनं तेषां वाहनादवरुह्य सः ॥४९॥ प्राप स्वभवनं रम्यं त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० नैवंचित्रशोभितम्॥तत्रसिंहासनेभद्रेपत्न्यातस्थौतदाग्निभूः॥५०॥तदाशचीसुरस्त्रीभिर्विमाने
९ नागताग्रहम्॥स्वकीयंसर्वरत्नाढ्यंसर्वाश्चर्यसमन्वितम्॥५१॥तदानीमग्निभूःप्राहब्रह्माणं
पार्श्ववर्त्तिनम्॥पट्टाभिषेकंकृत्वात्वमिंद्रमागच्छभूयसा॥५२॥संदेवस्यपरामाज्ञांकृत्वामू
रा० र्द्धिंस्वकेविधिः॥उपेक्षितानिद्रव्याणिसंपाद्यसाध्यतद्गृहम्॥५३॥कृत्वाभिषेकंशुद्धोदैःपट्ट
बंधंतदाकरोत्॥पुनःप्रापगृहाभ्याशंस्वयंतेनाभिपूजितः॥५४॥ततोमरुत्वानृषिभिराशिषा
संप्रयोजितः॥वंदितोनिखिलैर्देवैर्नृत्यद्भिश्चाप्सरोगणैः॥५५॥गायद्भिःकिन्नरवरैःकृतनानोप
चारवान्॥कियंतंकालमास्थायसिंहासनमनुद्विजाः॥५६॥प्रस्थितोदेवसेनेशंननामपरितोष
वान्॥शरजन्मामरुत्वंतंस्वयंपालयपूर्ववत्॥५७॥निष्कंटकंसुखेनत्वमित्युवाचदयानिधिः॥प्रे
षयामासविह्वादीन्स्ववेश्मनिप्रतिद्विजाः॥५८॥स्वगेहद्वारिवीरान्स्वान्कृत्वादेव्यास्वयंगुहः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥शुद्धांतंसंविवेशायंप्रीत्यापरमयायुतः॥५९॥उषित्वैवंकियत्कालंस्वर्गलोकेयथारुचि॥पुनः
स्कंदगिरौगंतुमियेषांगनयासह॥६०॥प्रस्थितःसहसास्वामिनब्रह्मविष्णुमुखान्सुरान॥
प्रणम्यपरयाभक्त्यावद्धांजलिपुटान्स्थितान्॥६१॥कृपयावीक्ष्यतान्स्वेषुलोकेष्वप्रेरय
द्गुहः॥प्रे रयित्वास्वयंदेव्यारथमारुह्यसुंदरम्॥६२॥सारथिंपरिकल्प्याशुवीरवाहुंमहावलम्
॥कैलासंप्राप्यवीरैस्तैर्भूतसेनाधिपैःसह॥६३॥अवरुह्यरथाद्देवंपरमेशंस्वमातरम्॥प्रणम्य
परयाभक्त्यातताभ्यांसंलालितस्तदा॥६४॥लब्ध्वानुज्ञःस्त्रियास्वीयैःप्रापस्कंदगिरिंपरम्॥तत्रसिं
हासनेरम्यमुपतस्थेद्विजोत्तमाः॥६५॥यस्त्वेतत्पठतेशृणोतिपरमंश्राव्यंसुपुण्यंप्रजनोगौरी
पुत्रविवाहमंगलकथासारंमहच्छ्रद्धया॥दीर्घायुःसमवेत्सदापशुपुत्राद्यैःसदाप्येधतेसत्यं
सत्यमिहोक्तमत्रचगुहःसाक्षीमहाब्राह्मणाः॥६६॥इतिश्रीशंकरसंहितायांदेवकाण्डेद्वितो

स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰सं॰ योध्यायः॥२॥सूतउवाच॥गुहेनप्रेरितादेवाःस्वानिस्थानान्यवाप्यते॥सुखेनतस्थुर्ब्रह्माद्याः
१० ध्यात्वास्कंदंनिजात्मसु॥१॥इन्द्रस्तुपीडांभूरेरणाक्रांतोस्मरत्वाक्षरोक्षरो॥वैराग्येणापरित्यक्तो
विनिंदन्संसृतिंस्वयम्॥२॥मौनीनतानननस्तस्थौध्यायन्हृदिसुषरामुखम्॥ज्ञात्वातुगीष्प
तिःशीघ्रमागत्यैनंसुरेश्वरम्॥३॥रहस्युपदिदेशास्यशास्त्रंमदनसंज्ञिकम्॥सतथेति
विनिश्चित्यमदनेनविमोहितः॥स्त्रीसंभोगेसुखंदृष्ट्वातत्त्यागेदुःखमेवच॥४॥जन्मनःफल
मेतद्धियत्स्त्रीसंभोगतःसुखम्॥ऐश्वर्यस्यबलस्यैवंविज्ञानस्याप्यसंशयम्॥५॥भोगे
षुपरमोभोगःसुखेचपरमंसुखम्॥तदेतद्द्रव्यलोभेनविनिंदंतिवृथाजनाः॥६॥इतिसंचिंत्यम
नसाप्रेरयित्वानिजंगुरुम्॥स्वराज्यंरक्षितुंपुत्रंजयंतंसंविधायसः॥७॥अहोरात्रंविलासे
नशच्यारेमेमुदान्वितः॥तदाजयंतःस्वर्लोकंपालयन्नीतिमार्गतः॥८॥कदाचित्स्वगुरुंप्रे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यसर्वशास्त्रार्थकोविदम्॥ब्रह्मविष्णुमुखानस्मानबाधयदहोगुरो॥९॥स्वरूपमामहाघोरःप्रेष
यित्वाह्वयैःस्वके॥तत्फलंकर्मणःकस्यसर्वदर्शिन्वदाधुना॥१०॥नकर्मणाविनाकिंचिद्भुज्यते
प्राणिभिःफलम्॥इतिपप्रच्छमतिमान्प्रणम्यैनंबृहस्पतिम्॥११॥गुरुरुवाच॥दक्षाध्वरेपु
रास्माभिरध्वरेशंत्रियंबकम्॥सनारायणकैर्मुक्तास्थितंभोक्तुंहवींषिहि॥१२॥तत्फलंवीरभ
द्रेणतदासंभोजितावयम्॥कर्मशेषवशादेषापीडाजातादुरत्यया॥१३॥व्याजेनस्वरूपस्येतिक
र्मणांकुटिलागतिः॥जयंतउवाच॥अध्वरेशंमहादेवंपुत्राणांप्रथमोविधेः॥१४॥स्वयंदक्षःपरि
त्यक्त्वादैवैतैर्दीक्षितोध्वरे॥तत्फलंवीरभद्रेणकदासंभोजिताःसुराः॥१५॥एतन्मेसंशयंछिंधि
सर्वज्ञानविशारद॥कर्मणोतंनिशम्यायंगुरोर्वदनपंकजात्॥१६॥परितुष्टोमहादेवंचिंतयंहृ न
दयांबुजे॥विनिंदकान्महादेवंधिक्कुर्वन्पापिनःसदा॥१७॥सुखेनपालयन्राज्यंनिवसन्ब्रा
ह्मणोत्तमाः॥ऋषयऊचुः॥वसन्स्कंदगिरौरम्येस्कंदःकिंकृतवांस्तदा॥१८॥वक्तुमर्हसित

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० सूतपुराणेषुविचक्षण॥सूतउवाच॥शृणुध्वमृषयःसर्वे यूयंश्रद्धासमन्विताः॥१९॥सौंदर्यवल्लीं
११ लवलींनायिकांपरांमुखस्ततः॥पाणिंजग्राहभगवान्लीलयाब्राह्मणोत्तमाः॥२०॥ऋषयः
ऊचुः॥कुत्रजग्राहतत्पाणिंवासवस्यसुतास्मृता॥लवल्याख्याभवत्तस्याःकेनवाहेतुनात
था॥२१॥वदैतदखिलंसूतवदतांवरनोधुना॥सूतउवाच॥कांचीपुरंजगत्ख्यातंवर्त्तते
यन्महत्स्थलम्॥२२॥तत्समीपेपुरंरम्यंमूर्धास्फाटीतिविश्रुतम्॥लवलीतिलयःकश्चिद्गिरि च
स्तत्रविराजते॥२३॥तत्रव्याधोवसच्छ्रीमानन्तपत्योमहाधनः॥व्याधानामधिपोनित्यमि
च्छन्स्वस्यसुतम्परम्॥२४॥गिरौतस्मिन्महारण्येशिवाख्येऋषिसत्तमः॥तपश्चचारपुण्या
त्मातपस्वीसत्यसंधनः॥२५॥सकदाचिन्मृगींरम्यांस्वसमीपेस्थितांऋषिः॥विलोक्यकाम
वशगोमुमोहनितरांतदा२६॥तदालोकनमात्रेणगर्भंधत्तेस्मसामृगी॥लवलीकुण्डमध्ये
सासुषुवेस्त्रियमुत्तमाम्॥२७॥विलोक्यतांविजातीयांदुद्राववभयविह्वला॥रुरोदतत्रसा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वालासुखेरेगात्तदा द्विजाः ॥२८॥ तांदृष्ट्वा व्याधवर्योयं हृदंतीमागतः कचित्‌ ॥ प्रियंगुव्रीहि
संपन्नकेदारालोकनायसः ॥२९॥ प्रीत्या परमयायुक्तोगृहीत्वातां मनोहराम्‌ ॥ गत्वास्व
स्यकुटुम्बिन्या हस्तयोर्दत्तवान्मुदा ॥३०॥ पुत्रोत्सवक्रियांकृत्वातदानींव्याधनायकः ॥
स्वस्त्रियानुदिनंकन्यामपोषयदहो द्विजाः ॥३१॥ वरधेसाक्रमेणैवकन्या द्वादशव
त्सरम्‌ ॥ रेराक्रीडाविलासेनवालवेषसमन्विता ॥३२॥ ततस्तुतांव्याधनाथः सम्पन्ना
प्रौढशेमुषीम्‌ ॥ केदारेकुत्रचिद्रम्ये स्थापयामासरक्षितुम्‌ ॥३३॥ शकुंताद्युपघातेभ्यः
सु प्रियंगून्व्रीहिरागवरान्‌ ॥ स्वेच्छायांतत्रकृत्वेयं भर्त्संयंतीपतत्त्रिराः ॥३४॥ ऊर्ध्वस्व
रैः शब्दभेदैर्न्यवसत्सुमनोहरा ॥ आलवालेलवाल्यासायत्तदाख्यावभूवहि ॥३५॥ ता
मेनांरक्षितुंस्कंदोमुक्त्वास्कंदगिरिंतदा ॥ प्रापश्रीपुरिपूर्णाख्यंपुरंपरमशोभनम्‌ ॥३६॥
गिरिं

शं॰सं॰ १२

तदानींनारदोदृष्ट्वालवलीनायिकामिमाम्॥ धराम्यस्कंदपत्नीतिज्ञात्वासर्वत्रसंचरन्॥३७॥
प्राप्यश्रीपरिपूर्णस्यगिरिंपरममद्भुतम्॥ तत्रदृष्ट्वागुहंदेवंदेवंनत्वाऋषीश्वराः॥३८॥ दृ
ष्ट्वागतोस्मिलवलीमित्युक्त्वादेवनायकम्॥ विशेषेणाप्रेम्णायंप्रेरयेस्वेच्छयापुनः॥३९
॥व्याधवेषंगृहीत्वाथनिरगात्षण्मुखस्तदा॥ समागत्यजवेनायंलवलीनायिकान्ति
कम्॥४०॥ कात्वंबालेसुताकस्यकिंनाम्नीतेक्ववाजनिः॥ कथमेतादृशींव्याधस्त्रीरत्न
मतिसुंदराम्॥४१॥ आस्थापयन्निमांत्वांहिप्रियंगून्नरक्षितुंवने॥ मार्गवाच्यंजन्मभूमे
र्मुक्त्वालज्जांवराननने॥४२॥ वदकिंचिद्विहस्यैनमवलोकयमामिह॥ जानासिविजनस्य
त्वमुचितंकाननस्यच॥४३॥ वनेषुनितरांभ्रांत्याखिन्नस्यास्यसुनायिके॥ अम्रतस्यपि
पासामेसुधापूर्णानिजाधरे॥४४॥ एवंवादिनिदेवेशेतस्मिंस्ताव्याधनायकः॥ सेवितोव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हुभिर्व्याधैःक्रूररूपैर्धनुर्धरैः॥४५॥वाद्यानामारवैर्भीमैःप्रतस्थेपुरतोद्विजाः॥तदानीमेवदेवोपि
गृहीत्वासनशाखिनः॥४६॥अनंतवेदशाखस्यरूपंपरममद्भुतम्॥तस्थेकेदारनिकटेछायांकृ
त्वासुशीतलाम्॥४७॥व्याधःसमागतःपुत्र्याःफलानिविविधानिच॥प्रियंगुपिष्टंसमधुं
वात्सल्येनददौद्विजाः॥४८॥अन्येतुजीविनस्तस्यवृक्षमेकंविलोकयते॥इतःपूर्वंनदृष्टो
यमितितिष्ठंतुतदागताः॥४९॥तांन्निवार्यप्रधानोयंव्याधःपुत्रीमवेक्ष्यसः॥वत्सेयंक्वागतो
वृक्षःसुच्छायस्तववसंगतः॥५०॥इत्युक्तवंतंजनकंनजानेहमिमंपितः॥मायेवभातिनित
रामित्युवाचवरानना॥५१॥मास्तुतेभीतिरेतस्माद्दूरवृक्षात्सुशीतलात्॥भवत्वयंसहायस्ते
काननेसुखदोनिशम्॥५२॥इत्युक्त्वाप्रययौव्याधोवनानिविविधानिच॥गतेसपरिवारेस्मिन्
जग्राहप्राक्तनंगुहः॥५३॥धनुष्पाणिर्महारूपोयुवानेत्रप्रियोवरः॥चाटुवाक्यानिभूयांसि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० जगदालिंगनोत्सुकः॥५४॥आलिंगनायतामेनामवदत्करौततोद्विजाः॥तमेनंसाभयोद्विग्ना
१३ प्राहवाचं नताननना॥५५॥अहंहीनकुलोद्भूतात्वंतुराजकुलोद्भवः॥प्रियंगुपालिकाराजन्
आवयोःकियदंतरम्॥५६॥नवेदृशंइहायुक्तंगच्छगच्छयथागतम्॥यदिदृष्टःपुलिंदै
स्त्वंतदाबाधाभवेद्ध्रुवम्॥५७॥इत्युक्तवत्यामेतस्यांतदानींव्याधनायकः॥समागतःपुन
र्व्याधैर्बहुभिःसुमहारवैः॥५८॥समादायगुहःशीघ्रंस्थविरंरूपमद्भुतम्॥ जरापलित
सर्वांगंदण्डमालंब्यपाणिना॥५९॥व्याधस्यतस्यभस्मानिददावाशीःप्रयुज्यसः॥गं
तव्यंकुत्रभवताकिमपेक्षितमत्रच॥६०॥इतिपृष्टस्तदातेनवृद्धःप्राहवचोद्विजाः॥कि
मप्यपेक्षितंव्याधपरंमेनास्तिवस्तुसु॥६१॥स्नातुंमांकुमरीतीर्थमागतंविद्धितेगिरौ॥
इतितस्यवचःश्रुत्वातत्प्येतिव्याधनायकः॥६२॥स्नात्वात्वमत्रमत्युच्चाःवससाहाय्यतांग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गत्वा सप्तगिरिभवः

व

तः॥ इत्युक्त्वा पूर्ववत्तस्तस्याः फलादीनि प्रदाय सः॥६३॥ ययौ स्वकीयैः पुरुषैर्योधो यं ब्राह्म
णोत्तमाः॥ ततो हृद्धसुतां कन्यां स्तुत्वीडा वर्त्तते मम॥६४॥ इत्युक्त्वादाय तद्धस्तात्
फलपिष्टमधून्ययम्॥ भक्षयित्वा पिपासामेव वर्त्तते तेत्युवाच ताम्॥६५॥ इतस्तडागः
सुमहान्नीत्वा सं गिरीन् भवान्॥ पीत्वा जलानि स्वादूनि पुनरागच्छ तु सत्वरात्॥६६॥
इति तस्या वचः श्रुत्वा न वेद्मि सरसी महम्॥ वृद्धस्ततस्त्वं साहाय्यं प्राप्य मार्गं प्रदर्शय॥
६७॥ सा तथेति विनिर्गत्य तटाकांतं निनाय तम्॥ पीत्वाकराठं जलान्येष तत्र गत्वा सरो
वरे॥६८॥ पुनरागत्य तां बालां त्वह्मामे जलकां क्षिराणी॥ निहत्वा वर्त्तते तत्वह्मा भवत्संभो
गलक्षणा॥६९॥ तां निवारय सर्वांगसुंदरे दयया मयि॥ त्वां नतोस्मि सुधापूर्णाम धुराध
रशालिनी॥७०॥ अंगीकुरुष्व त्वं विजने वने माचरते स्मरः॥ इति तस्य वचः श्रुत्वा लवलीह

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰स॰ द्र्मीस्यनम्॥७१॥ वृद्धस्त्वं तापसोद्यापि यत्किंचिद्वदसीह माम्॥ वयोधिको नमस्कारं क्रि
२४ यते चेति चोक्तवान्॥७२॥ अस्मदीयैर्यदि भवान् दृष्टस्त्वेतादृशस्तदा॥ बाध्यते नितरां त
त्वं पश्चादागच्छ संप्रति॥७३॥ पुरो गच्छाम्यहं शीघ्रादित्युक्त्वा प्रययौ पुरः॥ तदानीं
षण्मुखश्श्रेष्ठं गजवक्त्रमचिंतयत्॥७४॥ सनुसंधद्विपाकारो महावेगेन निर्ययौ॥ तं
दृष्ट्वा गजमत्युग्रं सा भीता भीता महाजवात्॥७५॥ आगत्य वृद्धमालिंग्य त्वदुक्तं तच्छृ
णोम्यहम्॥ रक्ष रक्ष गजाज्जस्माच्छरणागतवत्सल॥७६॥ इति तस्या वचश्श्रुत्वा प्र
णम्य गणनायकम्॥ तुष्टाव परया भक्त्या षण्मुखो वृद्धवेषवान्॥७७॥ उपसंहृत्य
तद्रूपं विघ्नेशोंतर्दधे द्विजाः॥ ततस्तु तां महारामेरम्येतस्मिन्नरराम सः॥७८॥ केशसंय
मनं कृत्वा दष्ट्वा दंतच्छदं रदैः॥ स्वस्वरूपं दर्शयामास संभोगानंतरं द्विजाः॥७९॥ तं दृष्ट्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षरामुखंभीताप्रीत्याचपरयामुदा॥प्रणम्यांजलिहस्तासाप्रागेवतवसुदरम्॥८०॥वपुरे
तादृशंदेवनप्रदर्शितवानसि॥प्रतारणंकृतंतन्ह्मीमहोलीलानवेदृशी॥८१॥इत्यादिवच
नंचोक्त्वातुष्टावलवलीगुहम्॥ततस्तामाहदेवेशोमंदस्मितमुखांबुजः॥८२॥विस्मोसंत्वत
नयापूर्वंतपःकृतवतीमहत्॥तपसातेनसंतुष्टः परांप्रीतिमवाप्यते॥८३॥त्वयिस्नेहर
साधिकाद्देवंसंयुक्तवानहम्॥तत्त्वंप्रियंगुकेद्वारेपुरोगच्छममाधुना॥८४॥आगमि
ष्यामितत्रापिमहाभागेजवादहम्॥इतिगुहवचनंनिशम्यवल्लीतदुपरिसंनिहितात्म
मानसेयम्॥विहितपरनमस्क्रियागुहस्यद्रुतमपिपूर्वमवापतत्स्थलंसा॥८५॥इति
श्रीशंकरसंहितायांदेवकाण्डेतृतीयोध्यायः॥३॥सूतउवाच॥ततस्तुतत्सखीकाचि
त्प्रियंगुव्रीहिपालिनी॥पप्रच्छक्वगताकाल्लमियंतमितितांद्विजाः॥१॥तामाहेयंतटाके

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं० स्मिन्स्नात्वाभूयःसमागतौ॥क्ववर्त्तेतेत[illegible]टाकोयंधैरस्यविभुविद्धिदः॥२॥सुरक्तेलोचनेरम्येके
१५ शाःस्वंसंतिसर्वतः॥प्रवर्त्तेतेमुखेस्वेदविंदवोपिमनोहराः॥३॥तवेत्युक्तवतींस्नात्वाशंकमानांनि
जप्रियाम्॥आरोपयसिनिन्दांत्वंसखिहेमयिसंप्रति॥४॥एवमन्योन्यमनयोर्वदंत्योरुत्त
रोत्तरम्॥समागतस्तत्रगुहोध्वतकार्मुकमस्त्ववान्॥५॥कृत्वाखेटमतिश्रान्तइवतेवाच
मुक्तवान्॥युवांबालेगजश्चेत्कंकिंदृदर्शतुहन्नतम्॥६॥मच्छराविद्धसर्वांगंपलायनमिह
श्रितम्॥इतिवाचंनिशम्यास्यसखीसापिजगादतम्॥७॥त्वद्वीर्यैतवतुल्यस्यवीरस्यवद
माचनौ॥इत्युक्त्वाचिंतयामासमनस्येवाद्विजोत्तमाः॥८॥उभयोरनयोर्दृष्ट्वाप्रख्यातोस्या
श्वमार्गराम्॥गजादीनांतथातस्यप्रियंगुर्वीहिरक्षिताम्॥९॥एवंसावीक्ष्यतेतांतुमय्ययं तंतं
वीक्ष्यतेतराम्॥इत्यसंदिह्यतावेतौलवलीखरामुखौसंतौ॥१०॥स्वकेदारेगतावेगान्मन्युना

खी नं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रे

वसमन्युना॥ अनुसृत्याश्रुतां देवः प्राप्यैनां ब्राह्मणोत्तमाः॥११॥ मास्तु कोपो वरारोहे युवयोर्य
द्पेक्षितम्॥ तत्प्रयच्छाम्यशीघ्रं ण दयां कुरु वरानने॥१२॥ समाकर्ण्यैवचस्तस्य राजा नो
व्याधकन्यकाम्॥ वांछन्निव भवानेनां कथमिच्छसि बालिकाम्॥१३॥ इयं विष्णोः वराद्व
ध्यमस्तं स्त्रीषु चोत्तमा॥ तपोमहिम्ना व्याधस्य बभूव तनुजा ननु॥१४॥ म यानियोज
यस्वेमां परेद्युः सुंदरे यदि॥ पटे लिखित्वा तां बालां मद्राम्पश्याम्यसंशयम्॥१५॥ इतितस्य
वचश्रुत्वा सखी प्राह गिरं तदा॥ न युक्तमीदृशं ते द्य वचनं मानिनां वर॥१६॥ आनयिष्या
मितां शीघ्रा द्वृक्षारामे मनोरमे॥ तिष्ठ तत्र यदि व्याधैरीदृशो वीक्षितस्तदा॥१७॥ परिपी
डा भवेत्तत्वं सावधानेन तिष्ठ भो॥ इत्युक्त्वाभ्यो शमागत्य लवल्याः सा सखी स्मरणात्॥१८
प्रणम्य वांछां तस्यैवमुक्त्वा तस्यै विशेषतः॥ आनीय वृक्षारामेस्मिन्कुत्रचित्तस्याप्यसंदरीम्॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०सं०
९६

१९॥स्वयंपुष्पोपहारस्यव्याजेनान्यत्रनिर्गता॥ततःसमागतोवीक्ष्यतामेनांलवलींगृहे॥२०॥
द्रुतमुत्थायसातस्मैप्रणाममस्मरातुरा॥तांसमालिंग्यदेवेशःसंपीड्यस्तनकुड्मले॥२१॥दष्ट्वाध
रंकृतनखक्षतरेखोररामताम्॥ततःसमागतापुष्पाण्याहृत्यैतत्सखीक्षणात्॥अप्रावध्यच्चिकु
रेष्वस्याःकुसुमानिबहूनिसा॥आहूयतांपुनःक्षेत्रेप्रियंगून्रक्षितुंययौ॥२३॥तत्रसालवलीत
स्येसंयोगःपरामुखस्यमे॥कदाभवेदितितरांविरहाकुलितांतरा॥२४॥अथव्याधाःसमागत्य
सुपक्वेषुप्रियंगुषु॥निन्यिरेलवलींबालांगेहंपरमशोभनाम्॥२५॥तत्सखीस्वगृहंप्रापसा
प्यनंतरमुज्वला॥पक्षिणांतत्रजातानांहक्षाणांगिरिगण्हरे॥२६॥मृगाणामपिचान्येषामु
त्कोत्काऽगमनंद्विजाः॥स्मृत्वातुलवलीदेवंमदनेननिपीडिता॥२७॥विहायकंदुकक्रीडामन्या
मपिशुभक्रियाम्॥मुमूर्छकामवशगाभृशमुद्विग्नमानसा॥२८॥ततोमातुर्मुखात्तस्याःपरिहृत्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

समंततः॥आशंक्यावेशमेतस्यानिहत्यैकुलदेवताम्॥२९॥ [illegible] गुहंमहोपचारेणनैवेद्यैरप्यतो
षयत्॥ततोधात्रींसमाविश्यगुहस्यामिततेजसः॥३०॥संयोगोभवदाहैवमावेशोब्राह्मणोत्त
माः॥श्रुत्वेयंगुहनामानिसमुत्तस्थेजवेनसा॥३१॥एवंवहुप्रकारेणतस्थेविरहविह्वला॥त
तोव्याधाःप्रियंगूंस्तान्अर्जुनान्पक्वतांगताम्॥३२॥संप्राप्यषण्मुखस्तत्रतामदृष्ट्वानि
जप्रियाम्॥इतस्ततश्चवीक्ष्यैनांविरहेणसमन्वितः॥३३॥पप्रच्छपर्वतान्वृक्षान्काननानि
मृगानपि॥वापीकूपतडागादीनक्षगताप्राणनायिका॥३४॥इतिपृष्ट्वारसेनायंसायाहूसं
गतेरवौ॥गृहपृष्ठेप्रदेशस्यगत्वाराज्ञावुमासुतः॥३५॥निर्यास्यतिकदारम्यासंवीक्ष्यात्र
स्थितोद्विजाः॥तदासागतातस्याःसखीसावीक्ष्यषण्मुखम्॥३६॥नलभ्यतेवकाशोत्रसं
योगायतवाधुना॥नयुक्तःखलुसंयोगोगेहेस्मिन्वालयासह॥३७॥तदान्यत्रानयिष्ये

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰सं॰ नांगच्छेत्युक्त्वास्वयंसखी॥समेत्यतत्समीपंसास्वपंतीमातरंतथा॥३८॥पितृनन्यानाप्यनि
१७ द्रान्विज्ञायैषाक्षरोन्नताम्॥निरर्गलकपाटंचकृत्वैनांगुहसंनिधिम्॥३९॥प्रापयि
त्वासखीस्कंदंप्राहवाचंद्विजोत्तमाः॥दृष्टोयदिभवान्व्याधैःकुहरेखिलविष्कृती॥४०
संरक्ष्यैनांतदान्यत्रगच्छेत्युक्त्वाकरौतदा॥लवल्याकरयोस्तस्यगुहस्यपरमात्मनः॥४१॥
ऽर्पयित्वागुहेनेयंसंतुष्टेनतुतांतदा॥कृतनानोपचाराभ्युप्रणम्यलवलीमपि॥४२॥परि
रम्यस्वयंगेहंप्रापानुमतिमप्यसा॥वल्लीगुहंप्रणम्याथवनेतमसिसाहसात्॥४३॥क
थमभ्यागतस्त्वत्ररक्षितुंमांकृपावशात्॥इत्युवाचततस्नेहाच्चारुवाक्यैर्मनोहरैः॥४४॥
श्रुत्वासुविस्मितोपश्चात्रम्यामपालेरलक्षितः॥दूरेकस्मिन्महारामेगत्वासाकंतयागु
हः॥४५॥रेमेसमंदहासेनरतितत्रविचक्षणाः॥व्यतीतायांततोरात्र्यांलवल्याजननीत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दा॥४६॥विज्ञायते मयानेषाप्रांतरेवेतिसाब्रवीत्॥ध्वनेत्तेयत्तनेहाहाकारेसर्वत्रभोसुराः॥
४७॥व्याधुनार्थेसमुत्थायसुतांपार्श्वेवीक्ष्यादृष्ट्वाससंभ्रमम्॥पप्रच्छतत्सखींगत्वालव
लीक्कगतेतितामथ॥४८॥स्ततोव्याधैर्निरगाद्द्रेक्षितुंरुषा॥चोरयित्वासुतांबालांकोजीवे
ष्यत्याम्रजनः॥४९॥इतिव्याधान्बहून्घोरान्मार्गेष्वप्रेरयत्तदा॥स्वयंवनेषुरम्ये
षु [illegible] पर्वतेषुसरित्स्वपि॥५०॥परिभ्रमन्क्रमेणायंहस्तारामम्वापतम्॥
तत्रदृष्ट्वासुतान्व्याधान्लवलीभयकंपिता॥५१॥समायांत्यत्रदेवेशरक्षमांशास्त्रपा
णयः॥इत्युक्त्वाप्रणतामेनांवीक्ष्यकिंचिद्विदुदाननः॥५२॥मास्तुभीतिर्वरारोहेमयिति
ष्ठतिवल्लभे॥तिष्ठमत्पृष्ठदेशेत्वंयोद्धुंशक्तिश्चवर्जते॥५३॥समाकर्ण्यवचस्तस्यपृष्ठ
भागमगाद्यदा॥तदैवतेसमागत्यपुत्रीचोरइतिक्रुद्धा॥५४॥जल्पंतःक्रूरवाचोस्मिन्ववर्षुः
सायकान्बहून्॥वह्नीतदाभयोद्विग्नासंहरैतान्महाखलान्॥५५॥पालयस्वमया

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दस्माद्रक्ष मां प्राणनायकः॥ इत्युवाच तदा देवमात्मसंरक्षणोद्यमम्॥५६॥ तच्छ्रुत्वा कुक्कुटं
देवस्तदास्माद्वीर्दुमासुतः॥ समागत्य जवेनायं महारावं चकार हि॥५७॥ निशम्य तं म
हारावं पयोबुदसमस्वनम्॥ पतित्वा भूतले सर्वे जहुः प्राणान्भयातुराः॥५८॥ इ
ति श्रीशंकरसंहितायां देवकाण्डे चतुर्थोध्यायः॥४॥ सूत उवाच॥ हत्वा तानखि
लान्व्याधान्निरगाद्देवनायकः॥ अनुसृत्य गुहं वल्ली पितुर्दुःखसमन्विता॥१॥
अवकुंठितसर्वांगा चलेनानुययौ द्विजाः॥ मध्ये मार्गे समागत्य तदा ब्रह्मात्मसम्भ
वः॥२॥ नारदस्तपतां श्रेष्ठो लीलामानुषविग्रहम्॥ प्रणम्य गुहमाकर्ण्य वृत्तांतम
नुपूर्वशः॥३॥ प्रार्थयामास देवेशं संश्रीव्यश्रुतान्स्मृतान्॥ एतत्पितृमुखान्स्वामिन्सर्वमं
गलसंयुतः॥४॥ वल्लीपाणिग्रहं पश्चाद्विधिनाकुरु देवप॥ इति तस्य वचः श्रुत्वा लोकपात्रा
विधित्सया॥५॥ निवृत्तो नारदेनायं लववल्लीं वीक्ष्य सुंदराम्॥ मदाज्ञया त्वमेवाद्य त्वत्पितृ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रमुखान्मृतान्॥६॥उज्जीवयवरारोहेवीक्ष्यदृष्ट्यादयान्विता॥तथैवोज्जीवयामाससर्वांने
तान्गुहप्रिया॥७॥उत्थितेषुपुलिंदेषुस्वापादिवमहीसुराः॥स्वरूपंदर्शयामासलीलामा
नुषविग्रहः॥८॥देवसेनापतिंदिव्यंषण्मुखंद्वादशेक्षणम्॥युगव्यायतमंदारमालाद्वा
दशास्त्रभूषणं॥९॥महोरस्कंबृहद्ग्रीवमप्राकृतमनुत्तमम्॥तंदृष्ट्वातेगुहंव्याधाःप्रणेमुर्भृश
विह्वलाः॥१०॥तुष्टुवुःपरयाभक्त्यापरिहृत्यसमंततः॥यदीदृशंकृतंदेवमर्यादोल्लंघनंत्व
या॥११॥अपकीर्तिर्भवेदस्मत्कुलस्यखलुगर्हिता॥तत्वमेनांविधानेनवोढुमर्हसिवि
श्वप॥१२॥इत्युक्त्वातेप्रणेमुस्तंकुमारंजगतांगुरुम्॥अंगीकृत्यवचस्तेषांकृपयादेव
नायकः॥१३॥नारदेनसमंगत्वापक्कणंव्याधसेवितम्॥तस्येव्याघ्रासनेदिव्येतदत्तेब्रा
ह्मणोत्तमाः॥१४॥तदाददृशुस्तांवालांदिव्यरूपांवरासने॥त्यक्त्वातन्मानुषंरूपंत्वचंजी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वर्य

शं०सं०
१९

र्णामिवोरगाः॥१५॥जलमादायहस्तेनतदाधारांपुलिंदपः॥गुहायवरदेर्पायविधानेनद्वि
जोत्तमाः॥१६॥अग्निकार्यंचकरिविवरोनारदोप्यकरोत्तदा॥प्रादुरासीत्तदाव्योम्निपार्वती
सहितःशिवः॥१७॥ब्रह्मविष्ण्वादिभिर्देवैःस्तूयमानपदाम्बुजः॥स्थित्वातत्रमहादेवः
कल्याणवपुषंगुहम्॥१८॥अवलोकयदद्रींद्रसुतयालवलीमपि॥नमस्कारपत्न्यातं
गुहोवेगात्समुत्थितः॥१९॥ववर्षुरमराःसर्वेपुष्पाणिशरजन्मनि॥प्रणेमुर्दंपतीवल्ली
गुहौतौविष्णुपूर्वकाः॥२०॥अन्तर्दधेमहादेवःस्तूयमानैःसुरोत्तमैः॥व्याधनायस्ततो
व्याधैःस्त्रीभिर्देवाधिपंगुहम्॥२१॥प्रणाम्यप्रापसंतोषंतद्दर्शनसंशंतदा॥ववर्षव्या
धनाथोपिकुसुमानिगुहोपरि॥२२॥एवंनानोपचारेणपूजितोदेवनायकः॥प्रतस्थेश्री
परिपूर्णगिरिंपरमशोभनम्॥२३॥निवर्त्यप्रस्थितान्व्याधान्सव्याधेशान्स्वपुरंप्रति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्याधस्त्रीभिस्स्वयंदेव्यावल्यागिरिमवापतम्॥२४॥तत्रसिंहासनंदिव्यंविश्वकर्मेविनिर्मित
म्॥नानारत्नप्रभापूर्णंदेव्यासाकमशिश्रयत्॥२५॥तदापप्रच्छदेवीसाप्रणम्यगुहम
व्ययम्॥किंनामायंगिरिःस्वामिन्महिमानंवदेतितम्॥२६॥गुहउवाच॥श्रियादेव्या
गिरिर्यस्मात्परिपूर्णस्तदाह्वयः॥युद्धेमयाहताःकेचित्तस्माद्युद्धगिरिस्ततः॥२७॥कां
चीपुर्याःसमीपोयंयस्मात्तेनविशिष्यते॥कांचीस्थलेषुपुण्येषुतीर्थेषुस्वर्णदीयथा
२८॥पर्वतेषुचसर्वेषुयथाकैलासपर्वतः॥वीरणावेरणुम्रदंगाद्यैर्विहराम्यत्रसर्वदा॥
२९॥पुरामांपूजयित्वात्रत्रिसंध्यंमघवानिह॥कह्लाराख्यंसरःस्नात्वास्वच्छांभःपरि
पूरितम्॥३०॥यत्रकह्लारपुष्पाणित्रिसंध्यंचदिनेदिने॥विकचंतिसुगंधीनिमत्स्त्री
त्यैतत्सरोवरे॥३१॥स्वामीयंलब्धवानत्रगिरौपरमशोभने॥पश्यंतियोगिरिवरंएत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰सं॰
२०

मत्रनरोत्तमाः॥३२॥तेषांपापानिनश्यंतिक्षिप्रमेवनसंशयः॥स्नात्वासरोवरेस्मिन्ये
मामर्चयंतिमानवाः॥३३॥मल्लोकंसंप्रयान्त्येवमत्कृपापरिपूरिताः॥ध्यायन्तियेपंच
दिनमत्रमांविजितेंद्रियाः॥३४॥लब्ध्वास्ववांछितानर्थानंतेमोक्षंप्रयान्तिते॥दृष्ट्वा
गिरिवरंयेवाननमंतिनराधमाः॥३५॥समार्जितंयत्नैःपुण्यंतन्मापफलदंभवेत्॥महा
पातकसंयुक्तायेनमंतिनगोत्तमम्॥३६॥विधूयतानितेब्रह्मविष्णुपूर्वैश्चवंदिताः॥मत्प
दंप्राप्नुवंत्येवनात्रकार्याविचारणा॥३७॥यदेकंमनुजैरत्रपुण्यंसम्यगनुष्ठितम्॥अनं
तफलदंतस्मात्सत्यमुक्तंनचान्यथा॥३८॥यद्यद्घोरतरंपापंतत्तदत्रविनश्यति॥एवमा
दिवचःश्रुत्वागुहस्यपरमात्मनः॥३९॥तरांप्रीतिमवापासौमंदस्मितमुखांबुजा॥तत्रशैवंप
रंलिंगंप्रतिष्ठाप्यामरेश्वरः॥४०॥पूजयित्वापुरारातिंकृपांप्राप्यमहेशितुः॥स्थित्वात्रकति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चिरकालंनगानामुत्तमेद्विजाः॥४१॥दिव्यंविमानमारुह्यपत्न्यासहदेवपः॥प्राप्यस्कंद
गिरिंरम्यंविमानादवरुह्यसः॥४२॥तत्रस्वगेहमुद्द्यानंप्रापदेव्याद्विजोत्तमाः॥प्रणनामत
तोदेवंदेवसेनासमागता॥४३॥प्रीत्यातांवीक्ष्यदेवेशःकृपांचक्रेमुदातदा॥देवसेनांनना
माधवह्लीपरमशोभना॥४४॥आलिंग्यजातहार्दोतांस्मितपूर्वमभाषत॥सुसहायाग
तामस्यंत्वमत्रननुवालिके॥४४॥प्रीतियुग्भ्यांगुहस्ताभ्यांसिंहासनमशिश्रयत्॥देव
सेनाततस्कंदमात्मनःपतिमव्ययम्॥४५॥अपृच्छदानतावल्यावृत्तांतमानुपूर्वशः॥
गुहउवाच॥युवामुपेंद्रतनुजेपूर्वमास्तांवरानने॥४६॥मत्पाणिग्रहमुद्दिश्यतेतपो
श्रियतंमहत्॥तपसातेनतुष्टोहंभुक्त्येनांत्वामरुत्वति॥४७॥उत्पत्त्येकृताज्ञातौयुवा
मुत्पत्तिमाश्रिते॥तथैवत्वामिंद्रपुत्रींविधिनांगीकरोम्यहम्॥४८॥इयमग्नौपुनस्य

व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्काकांचीपुरसमीपतः॥लवल्याख्यगिरौरम्येमत्स्नेहातिशयान्विता॥४९॥तपश्चचार
परमंध्यात्वामामेवमानसे॥तत्ररम्येवनेकस्मिन्करावशापवशाद्धरिः॥५०॥शिवक्र
ष्यभिधस्तत्रचचारपरमंतपः॥तत्रागतानदालक्ष्मीर्हरिरणीरूपमास्थिता॥५१॥तांद
ष्ट्वाकरषिवर्योयंमुमोहमदनातुरः॥लवलीकुराडमध्येयंतदुत्पन्नावरांगना॥५२॥तदा
ल्लयाजगत्यस्मिन्प्रतीतातेनसुंदरी॥उपेन्द्रःकरावशापेन निषादानांकुलेजनिम्
॥५३॥अवाप्यव्याधनाथोयंदष्ट्वातांलवलींतदा॥समादायस्वियेस्वस्यदत्तवाननपत्य
वान्॥५४॥तामिमांप्रीतिसंयुक्तोविवाह्यविधिनाप्रिये॥स्थित्वास्मीपरिपूर्णाख्यगिरौ
साकंतयापुनः॥५५॥प्राप्तवानस्मिनिकटंत्वनयासहतेप्रिये॥श्रुत्वेतंदेवसेनासानि
तरांहृष्टमानसा॥५६॥तत्रतत्रस्थितेदेवयुयोजेतत्रतामिमाम्॥सोदर्यैकरुरगात्तत्तेज

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गादेवंगुहंतुसा॥५७॥ततस्तुलवलीदेवसेनांवीक्ष्यतवानुजा॥इदानींसर्वदामांत्वंरक्षेत्यु
क्त्वाननामसा॥५८॥आलिंग्यतांदेवसेनासखीत्वंहृदयंगमा॥त्वयागुहकृपापूर्णाका
रितामयिवालिके॥५९॥कृतार्थातदिहान्यंतंइत्युक्त्वातेपरस्परम्॥गुहपार्श्वगतेदेव्यौ
रेजातेनितरांद्विजाः॥६०॥मयूरकुक्कुटौतस्यमनोवेगरथस्तथा॥अजशक्तिविमा
नानितस्युस्तत्रगुहाज्ञया॥६१॥गुहस्तुवीरैःसेनेशैर्भूतैरपिमहाबलैः॥कृतनानोप
चारेणतस्थौस्त्रीभ्यांवरासने॥६२॥इतिगदितमशेषंयद्धिपृष्टंभवद्भिर्निखिलसुख
राणामीशितुःषण्मुखस्य॥चरितमथपुनर्वोवच्मियच्छ्रोतुमिच्छासकलमपितदत्र
ब्राह्मणानामधीशाः॥६३॥इतिश्रीशंकरसंहितायांदेवकाण्डेपञ्चमोध्यायः॥५॥ऋष
यऊचुः॥मुचुकुंदइतिप्रोक्तःसूतपूर्वंत्वयानृपः॥कल्याणायागतःकोयंस्कंदस्यपरमा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰सं॰ त्मनः॥१॥सूतउवाच॥श्रोतव्यंसावधानेनवक्ष्यैनंब्राह्मणोत्तमाः॥पुराकैलासशिख
२२ रेपार्वतीपरमेश्वरौ॥२॥शृंगारवनमालोक्यबिल्ववृक्षस्थलींस्थितौ॥तदानींवानरःक
श्चिच्छ्यामवक्त्रोमहाबलः॥३॥आरुह्यवृक्षंपत्राणिबिल्वानिपरयामुदा॥छित्वातयो
स्तातोभक्त्यापातयामासभूयशः॥४॥किमेतदितिवृक्षंतद्वलोकयदद्रिजा॥वृक्षस्यो
परिवीक्ष्यैनंवानरंकोपविह्वला॥५॥व्यजिज्ञपन्महादेवंचेष्टास्यैतितदाशिवा॥प
रमेशस्तदादेवीमावयोर्भक्तिमानयम्॥६॥इत्युक्त्वातंकपिश्रेष्ठमाहुयामासदेव
पः॥आहूतःससमागत्यप्रणनाममहेश्वरम्॥७॥तमेनंपार्वतीनाथःकृपयापर
यान्वितः॥सार्वभौमोभवाशुत्वंबिल्वपत्रैर्मदर्चया॥८॥भुविसर्वमहीपालमौलिला
लितपादवान्॥अन्तेकैलासमागत्यगाणापत्यंसुदुर्लभम्॥९॥अवाप्यपरयाश्री

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्यावसेत्येवमुवाचतम्॥ अप्रार्थयदुमादेवं मुचुकुंदोमहाबलः॥१०॥देवदेवमहादेवक
रुणामृतसागर॥ यद्युत्पत्तिर्भवेदस्मे भवद्भक्तायविश्वप॥११॥तदाज्ञानंभवेन्नूनंतन्मे
वदनमीदृशम्॥ ममाकारंभवत्वीशरक्षमांपरयामुदा॥१२॥इतिप्रसाद्यदेवेशंहरिश्चं
द्रान्वयोभवत्॥ गुहकल्याणमन्वीक्ष्यभक्त्यापरमयागुहे॥१३॥मुचुकुंदइतिख्या
तःसर्वदेशेषुसर्वदा॥ गुहवृतानिदिव्यानिवसिष्ठात्तपतांवरात्॥१४॥श्रुत्वायथाक
मेणाय माचचाराद्देरेणासः॥ मुनयऊचुः॥ मुचुकुंदोनृपश्रेष्ठोवसिष्ठादृषिस
त माता॥१५॥समाकर्ण्याचचारायंव्रतानिपरयामुदा॥ अनुष्ठितानिकैःकानिव
दत्वमृषिसत्तम॥१६॥सूतउवाच॥ पुराभगीरथोनामराजापरमधर्मवान्॥पराजितोर
णेसोयंघोरसंज्ञेनरक्षसा॥१७॥सकुटुंबोवनंप्रापदेशभ्रष्टस्तदाभयात्॥राज्यंचवंधितं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰सं॰ तेनराक्षसेनास्यभूसुराः॥१८॥वनंगतस्तदाराजागुरोस्तुऋषिसत्तमात्॥श्रुत्वागुहव्रतंदि
२३ व्यंभक्त्यापरमयासह॥१९॥भृगुवारेविधानेनसंकल्प्यब्राह्मणोत्तमाः॥वर्षत्रयंच
चारायंशुक्रवारेपरंव्रतम्॥२०॥ततःकालेनतंघोरंराक्षसंशक्तिरव्यया॥गुहस्यदेवदे
वस्यमारयामासभूसुराः॥२१॥भगीरथस्तुसंतोषात्स्वराज्यंप्राप्यपूर्ववत्॥निष्कंट
कंमहाराजोररक्षनिखिलांमहीम्॥२२॥शुक्रवारव्रतंतस्मात्गुहस्येष्टफलप्रदम्
॥नारदस्तपतांश्रेष्ठश्चरित्वाव्रतमुत्तमम्॥२३॥कृत्तिकायांविधानेनश्रेष्ठोभूदृषि
षुस्वयम्॥तस्यामेवद्विजःकश्चिद्व्रतमेतदनुष्ठितः॥२४॥मनुर्भूत्वासतुश्रीमान्स्वभा
रपृथिवीमिमाम्॥पुनरस्यांद्विजोन्योपिसमाप्यव्रतमुत्तमम्॥२५॥त्रिशंकुनाम्ना
पृथिवींशशाससनृपाधिपः॥अपरोद्विजराजानावनुष्ठायव्रतंमहत्॥२६॥कृत्तिकायां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यथाशक्त्या भक्तिमंतौ गुहोपरि॥ संरक्ष्य राज्यमाख्यातौ तौ द्वावन्तिमसंधिमौ॥२७॥दे
हान्ते प्रापतुर्मोक्षं गुहस्यैव प्रसादतः॥स्कंदषष्ठीव्रतं त्वन्यद्विख्यातं भुवनत्रये॥२८॥च
रित्वा यत्सुरा देवाः कश्यपश्च तपोधनाः॥त्यक्त्वा सुरभयं प्रापुः पदानि स्वानि पूर्ववत्
२९॥एवमादीनि राजासौ मुचुकुंदो महामनाः॥आचचार क्रमेणैव गुहे विन्यस्त
मानसः॥३०॥प्रादुरासीत्ततस्तस्य परमात्मा गुहः स्वयम्॥वांछितानि प्रदास्यामि वदे
ते ता निन्टपोत्तम॥३१॥इति ब्रुवंतं राजा प्रणम्य भुवि दंडवत्॥स्तुत्वैनं विविधैः स्तोत्रै
र प्रार्थयदयं द्विजाः॥३२॥नवसंख्याधिकालक्षवीरा देवकृपानिधे॥भवंतु मेनुज्ञा
स्वामिन्सहायान्प्राप्य तानिमान्॥३३॥निष्कंटकमिदं राज्यं पालयिष्याम्यनुज्ञया
॥श्रुत्वैतद्वचनं स्वामी तथेत्युक्त्वा दयानिधिः॥३४॥वीरवाहुमुखान्वीरानवलोक्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्रवीद्वचः॥यूयमस्यानुजाःशीघ्रंभवताद्यममाज्ञया॥३५॥इत्युक्तिमस्यसंश्रुत्यवीरास्ते
भयकम्पिताः॥दैत्यसंहारकारान्नोदेवदेवकथंरुचिः॥३६॥भवेदस्यानुजत्वेनतदत्य
ल्पेजगतांप्रभो॥इतितेषांवचश्रुत्वाकोपाकुलितमानसः॥३७॥पुनःप्राहगुहोवी
रान्वीक्ष्यसंभर्त्सनेनतान्॥नांगीकुरुतमद्वाक्यंयस्माद्यूयंतुगर्विताः॥३८॥प्राप्य
मानुष्यमेतेनस्थित्वाचास्यानुजाक्षितौ॥तपःकृत्वापुनःपश्चाद्विशुद्धाःकिल्विषाद
तः॥३९॥आगच्छतममाभ्याशंपुनरंतेममाज्ञया॥इत्युक्तमात्रेतेवीराःमानुषंरूप
मास्थिताः॥४०॥क्षंतव्योनोपराधोयंदेवदेवकृपानिधे॥इत्युक्त्वादण्डवद्भूमौप्रणे
मुर्भयकम्पिताः॥४१॥लब्ध्वानुज्ञास्ततोभूपस्यानुजत्वंसमाश्रिताः॥परिवव्रुःश
चीभर्त्तुरुपेंद्रइवभूसुराः॥४२॥मुचकुंदायभूपायगुहःपरमपावनः॥अनुग्रहंवि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धायैवं श्रंतर्धानं समाश्रितः ॥४३॥ मुचुकुंदस्ततो धीमांश्चतुरंगवलं महत् ॥ प्रत्येकं सं
व्यवस्थाप्य भ्रातॄणां परयामुदा ॥४४॥ राज्यं चकार संतोषात् सुब्रह्मण्यं हृदि स्मरन्
॥ ततः स्वकुरसञ्ज्ञमे राजकन्यास्मतां गताः ॥४५॥ पारगीन् संग्राहयामास भ्रा
तॄणामप्सरस्त्रियः ॥ पुष्पगंधिं विवाह्यापि वीरवाहुर्महावलः ॥४६॥ पुत्रीमुत्पादयामा
स कनकानकसंज्ञकां ॥ सा कुंदुहिता परया चित्रवल्याख्यया द्विजाः ॥४७॥ श्रजी
त्यांश्च जनत्तदा वीरान् पुत्रानन्येपि भूयसः ॥ वीरवाहुर्ददौ पुत्रीं चित्रवल्लीं मनोहराम्
॥४८॥ कल्पितज्येष्ठभावाय मुचुकुन्दाय शास्त्रतः ॥ तस्याः करस्थितं वीरं चित्रव कंकणविशेषः
ल्यामनोहरम् ॥४९॥ यमदूतागृहं गत्वा यमपत्न्यै मुमुदे तदा ॥ कांक्षिरायै प्रददुः
शीघ्रं वलात्कारेण भूसुराः ॥५०॥ हृतं ज्ञात्वा मेतच्छ्रुत्वापि वीरास्ते क्रोधविह्वलाः ॥०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं० सं०
२५

न

युद्धं कृत्वा यमेनैतेगृहीत्वा पुनराश्रुतम् ॥५१॥ चित्रवल्या प्रदत्वैनं तेनुः प्रीतिं तदा भृशम् ॥ अप
न्तर्वत्न्य भवद्बाला चित्रवल्लीन्रपप्रिया ॥५२॥ तदा केरलदेशस्थं फलमैच्छन्महद्रसम् ॥ वी
रास्तत्रत्यराजानं दूतवक्त्रेण भूसुराः ॥५३॥ पप्रच्छुरेतद्भूपेन नंदनेक्रोधविह्वलाः ॥ जि
त्वा तं रणमध्ये तत्फलं संगृह्य शीघ्रतः ॥५४॥ ददुरेतत्फलं तस्यै चित्रवल्ल्यै तदाबलाः
॥ तत्रतत्रस्थितान्दुष्टान्जित्वा देशेषु संगरे ॥५५॥ स्ववशीकृत्य गां सर्वां ररक्षुर्न्याय
वर्त्तिनः ॥ चित्रवल्ल्यग्निवर्णाख्यं कुमारं सुषुवे तदा ॥५६॥ मुचुकुंदस्य भूपस्य प्रिया
सर्वांगसुंदरा ॥ तस्मिन्काले शक्रपुरीं बलो नाम महासुरः ॥५७॥ अरौत्सीद्रणाद
र्पोयं जित्वेन्द्रं तु बलाद्द्विजाः ॥ तेन योद्धुमशक्यत्वात्सुराणामधिपस्तदा ॥५८॥ मुचु
कुंदं नृपं प्रेष्य दूतैरानयदात्मनः ॥ मुचुकुंदः समागत्य बलसेनां महाबलाम् ॥५९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अमारयन्महासत्वोरणमध्यंसमाश्रितः॥ प्रविशिष्टस्तदातस्यैवलस्कोमहा
सुराः॥६०॥ वज्रेणमरुतामीशस्तंजघानमहासुराः॥ वलारिःकथितस्तेन
तदारभ्यपुरंदरः॥६१॥ हत्वावलंमहाघोरंमुचुकुंदेनभूभुजा॥ स्वर्गहंप्रा
पमघवान्संतोषेणमहोत्सुकः॥६२॥ इतिश्रीशंकरसंहितायांदेवकांडे
षष्ठोध्यायः॥६॥ सूतउवाच॥ ततस्तात्वान्नपसुराधीशोपरमशोभनो॥ पू
जागृहंपुरारातेर्विवेशतुरमूमुदा॥१॥ उपविष्टोनृपश्रेष्ठः सुखमासनमुत्त
मम्॥ ददर्शपूजाकालेस्यसोमस्कंदंमहेश्वरम्॥२॥ प्रसन्नवदनांभोजंपर
मानंदविग्रहम्॥ तंदृष्ट्वापरमेशानंमुचुकुंदोनृपोत्तमः॥३॥ कैलासवासि
नंदेवमं[illegible]बिकासहितंप्रभुम्॥ स्मृत्वातुष्टावभक्त्यातमानंदाश्रुपरिप्लु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰सं॰
२६

तः॥४॥तस्मैप्रसन्नोभगवान्मुचुकुंदायभूभुजे॥विष्णुनाराधितःपूर्वमहमिंद्रमि
हागतः॥५॥तत्त्वंमांपूजयाविद्वन्मद्भक्तेषुवरोयतः॥इत्युपांशुमहीपालंप्रा
हवाचंमहेश्वरः॥६॥नश्रूयतेयथेन्द्रेणागतश्चैवब्राह्मणोत्तमाः॥तच्छ्रुत्वामु
चुकुंदोयंप्रसन्नेनांतरात्मना॥७॥तस्यैपूजांसुरेशस्यविलोक्यानन्यमानसः
॥समाप्यपूजामिंद्रोपिप्रस्थितोभूभुजासह॥८॥प्राप्यभोजनशालांस्वांका
मधेनुमचिंतयत्॥धेनुःसमागताशीघ्रंकामदास्वाश्रितायसा॥९॥भोज
यित्वातथादत्तमन्नंदिव्यंपयोयुतम्॥दापयित्वाविभूषाश्चवस्त्राण्यपिमही
भुजे॥१०॥पप्रच्छभूयोभूयोपिवांछितंवदहेनृप॥इतिप्रेम्णासुरेशानःमुचु
कुंदंमहीसुराः॥११॥तच्छ्रुत्वासमहीपालःसंतोषेणायुतस्तदा॥प्रपच्छसांव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मीशानंत्वयामेशाङ्कपूजितम्॥१२॥तमेवं परमेशानंपूजयिष्यामिभक्तिमान्॥निश
म्यैतत्सुरेशोपिविचारेणमहीयसा॥१३॥प्राहवाचममंवीक्ष्यनमदीयोमहेश्वरः
॥विष्णुनाराधितोदेवःसत्यमुक्तंमयानृप॥१४॥तत्पूजाकारणंवक्ष्येशृणुरावेक
म नसाधुना॥निरपत्यःपुराविष्णुःपरमेशंहृदिस्मरन्॥१५॥तपश्च चार
सुमहत्पुत्रार्थमवनीपते॥प्रसन्नेचमहादेवेप्रणाम्यपरयामुदा॥१६॥देव
देवमहादेवत्वयादत्तंमहत्पदम्॥आयुश्चानंतसंख्याकंनकिञ्चिन्न्यूनमद्य
मे॥१७॥तवप्रसादात्पुत्रोमेभूयाद्दयकृपानिधे॥निरपत्यस्यदेवेशनदुःखंघा
तयाशुमे॥१८॥इतिसंप्रार्थयामासपरमेशंतदाहरिः॥तथेतिपार्वतीनाथोवरंप्रा
दाद्धरेस्तदा॥१९॥तदेतत्सर्वमालोक्यपार्वतीकुपितातराम्॥यस्मान्महेशंमुक्त्वा
श्रीं त्य

वंचकोयंमहामायीमोहयित्वामनोऽखिलान्॥ब्रह्मास्मीतिसदाजह्न पन्त्वयिब्रह्मणि जाग्रति॥

रां॰सं॰ मांमन्युयुक्तंत्वसौहरिः॥२०॥अवाप्तवान्वरंतस्यजातःपुत्रोमदाज्ञया॥भवेन्नेत्रा
२७ ग्निनिर्दग्धोभवत्वस्यदयानिधे॥२१॥पातयामासदुर्मार्गेतद्दस्यमुखमीक्षितु
म्॥नयुक्तमितिदेवेशमुक्त्वाहूयजगत्पतिम्॥२३॥अंप्रतद्धिशम्भुनाप्राप
पार्वतीभवनेक्षणगात्॥ततोविष्णुःसुदुःखार्तोसोमस्कंदममुंवरम्॥२४॥
प्रतिष्ठाप्यविधानेनबहुकालमपूजयत्॥ततःकालेमहादेवस्तस्मिन्नंवि
कयासह॥२५॥सयरामुखोहरेःशम्भुराविरासीद्दयानिधिः॥तुष्टावसांवस
सुतंपरमेशंपुनर्हरिः॥२६॥ततःप्रसन्नोभगवान्गौरीमुखमलोकयत्॥त
दिङ्गितंहरिर्ज्ञात्वाप्रणम्योमांगिरीन्द्रजाम्॥२७॥अज्ञानेनभवानीत्वामसंपूज्य
महेश्वरम्॥अपूजयंतमेवैकमपराधोभवन्मम॥२८॥महांतंकालमारभ्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सु

सुरार्थेचतपः कृतं ॥ तत्त्वंरक्षमहेशानिधारंसंहारोभवत्विति ॥ २९ ॥ इतिश्रुत्वामहादेवीममार्थे
यद्धोस्मजः ॥ ततोहैमवतीविस्मुमसन्नाजगादतं ॥ ३० ॥ विस्मोभवतुदग्धस्यत्वत्सुतस्यम
हेश्वरात् ॥ पुनःसंजीवनंशीघ्रंमहाज्ञानिगरीयसी ॥ ३१ ॥ इत्युक्तोनदेविंमापगिरिजाशंभुना
सह ॥ ततःसंतुष्टमनसाविस्मुभेस्मुमेनोभवं ॥ ३२ ॥ मनसोजीजनत्स्मत्वांमहादेवाज्ञयासुते ॥
संवर्धितोयंहरिणाबहुकालंमनोभवः ॥ ३३ ॥ सुरकार्येसमुद्दिश्यदग्धस्त्रिपुरविद्विषा ॥ पुन
स्त्वाहिनस्तेनमसन्नेनशिवेनसः ॥ ३४ ॥ तमिमंविग्रहंविस्मुःपूजयित्वासवान्वरं ॥ उरसा
रोप्यदेवेशंशेषशायीहरिस्तदा ॥ ३५ ॥ क्षीराब्धौवैजगामायंनिद्रांयोगात्रूपांतदा ॥ वसोमध्ये

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शां०सं० तदाविष्णोः सोमतस्कं दोमहेश्वरः ॥३६॥ अनंतविष्णोरुच्छ्वासनिश्वासांदोलितः शिवः ॥३
२८ तस्ततश्चचालायं श्वासवीवयपवनाहतः ॥३७॥ स्वंवगतेहरैर्निद्रामनुमारेण्यवसमि ॥ समाग
तस्तदापोत्थुवाक्कालास्वामहासुरः ॥३८॥ ततोभीतमनाः श्रीघ्रमहंविष्णुपयोनिधौ ॥ बो
धितुंगतवानस्मि रत्नांतेभूपतेतदा ॥३९॥ प्रबुद्धः सहसाविष्णुरुस्थितोमांविलोक्यच ॥ एम
ज्ञात्वामहागमंत्वासोमास्तुभीनिस्तवेत्तिमां ॥४०॥ उक्त्वोरस्थितमीशानेहत्वास्माकमनु
शिवं ॥ स्वयंनिर्गत्यभूलोकेपुंडरीकपुरंप्रति ॥४१॥ आपन्नरूढ्ढामहादेवंनत्वाचिद्रूपिरंगशि
वं ॥ आनंदाश्रुपरीतांगस्तदागद्गदवाक्हरिः ॥४२॥ चातुर्मास्यांतमज्ञात्वानाकिंचिदपिमा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धवः ॥ स्थित्वासमुत्थितः शंभोःप्राप्यानुग्रहमद्भुतं ॥ ४३ ॥ निर्गत्यपुरेदेवात्कार्गिंहत्वाघोरंम
हासुरं ॥ क्षीरार्णवमनुप्राप्यमांपुरंप्रतिमाधवः ॥ ४४ ॥ प्रेषयित्वायथापूर्वंअधिक्षिप्येमहे
रंगे ॥ गत्वाहंस्वपुरंरम्यंतद्दारभ्यमहेश्वरं ॥ ४५ ॥ उमयासहितंदेवमभ्यागृह्णमव्ययं ॥ अर्च
याम्यमुमीशानमनन्यमनसान्वप ॥ ४६ ॥ तदातुमाधवस्यैनेनप्राप्यानुमतिंपरां ॥ नशक्य
तेनपश्चेत्रष्टुंविष्णोरमिततेजसः ॥ ४७ ॥ तदनुज्ञामवाप्याप्युगृहीतुंशक्यतेभवान् ॥ इति
तस्यवचः श्रुत्वामुचुकुंदोमहानृपः ॥ ४८ ॥ विष्णोरभ्याशमापायमुक्तैकेतदखिलंवचः ॥
प्राप्तानुज्ञः समागम्यसुरारिणामधिपंपुनः ॥ ४९ ॥ विष्णोरनुज्ञासंप्राप्तामयाद्देववराधुना ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०के सं०
२८०

तद्दानुमर्हतिभवानपरमेशंसमुरेश्वर॥५०॥इत्युक्तिमस्यसंश्रुत्यविचारोरगमहीपतः॥विमनाहानुमीशाने
सोमस्कंदेद्विजोत्तमाः॥५१॥त्वङ्गुश्रुविमिताःनस्यानदुःस्यसहृद्धोत्ततान्॥प्राहानक्रमेरगेदेवेशोविग्रहान
मृभुजेतहा॥५२॥विलोकनानपंक्तान्नाकपदेवमानक्रतोः॥नमेवविग्रहंभूपःपप्रच्छसुरपुंगवं॥५३॥न
तःप्राहास्मुरेशोस्यतंदेवंपरापमुहः॥महीतापप्रमक्ताद्देवमुत्तुकुंदेनयोत्तमः॥५४॥कमलालयमागत्यस्था एम
नानामुत्तमोत्तमं॥अनिच्छायाविधानेनदेवेक्रमेणोस्तवाद्भिः॥५५॥महोपचारैर्देवस्यसोमस्कंदस्यभक्तिमा
न्॥तस्मीपपुरेप्सन्यान्विग्रहान्वृद्धपिद्विजाः॥५६॥अपूजयन्महान्मायममवजीवोद्विजोत्तमाः॥देव
त्वन्निमापापमसुरेश्वोपिमहेश्वरं॥५७॥त्वांत्मनापूजितंपस्मात्सोमास्कंदेमहत्तमान्॥कमलालयमे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं०दे०मं०८
३०

वाप्यंपुराणप्रोक्तेनहाम्रणान् ॥५८॥ शाशाराधंस्तनःकृत्वामहादेवस्यपावनात् ॥ प्रसादपरमेशानेमाप्नुवा
निकृतांपुनः ॥५९॥ मुचुकुंदोमहीपालोनिर्मायत्रिपुरद्विषः ॥ प्राकारमंडपाट्टालगोपुराद्दीनवेकशः ॥६०
चालयित्वामहाभूमौमहादेवस्यभक्तिमान् ॥ निष्कंटकमसौराज्यभारंभृत्वामहाधनः ॥६१॥ आत्मजा
याग्निवर्णायपरदेवेधविहायसः ॥ कैलासंपर्वतश्रेष्ठमायातेत्रात्मरोणतमाः ॥६२॥ वीरबाहुमुखा
वीराभियस्याप्यात्मजान्स्वकान् ॥ अग्निवर्णस्यनिकेतेतपःकृत्वासुदुष्करं ॥६३॥ मुक्ताप्युमानु
षान्देहान्गृहीतात्मशरीरिणः ॥ प्राप्यस्कंदगिरिंरम्यंशरण्यगुहमव्ययं ॥६४॥ तत्रतस्थुःसुसंतोषा
त्संप्राप्तात्तदनुग्रहं ॥ इत्यादिमहापुराणेस्कांदेशिवरहस्यखंडेशंकरसंहितायांदेवकांडेसप्तमोध्यायः
॥७॥ ॥७॥ देवकांडःसंपूर्णमगमत् ॥ ग्रंथसंख्या ५००॥

रम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri